❀ शिवायों नमः ❀

❀ लघुशब्देन्दुशेखरप्रकाशः ❀

—❀—

वाराणसेय-नित्यानन्दवेदविद्यालय व्याकरण
प्राध्यापकेन कामाख्याविद्यालय-
प्रधानाध्यापकेन च

श्री शुकदेव झा मैथिलेन

सङ्कलितः,

तेनैव

संशोधितश्च ।

स च-

उत्तरप्रदेशस्थबलियामण्डलान्तर्गत 'हथौंज' ग्रामवास्तव्येन

ब्रह्मचारि रामनगीना शर्मणा प्रकाशितः ।

[सङ्गणकसंस्करणं दासाभासेन हरिपार्षददासेन कृतम्]

❁ शिवायों नमः ❁

❁ लघुशब्देन्दुशेखरप्रकाशः ❁

भागलपुरमण्डलान्तर्गतसिमराग्रामवास्तव्येन श्रीमन्मालिक-
झाशर्मतनुजन्मना पण्डित **शुकदेवझा शर्मणा**
सङ्कलितः ।

वाराणसेयलालेश्वरपाठशालाप्राध्यापकत्रिपाठ्युपाह्ववैदिश,
श्रीपं० भागीरथप्रसाद 'वागीश' शास्त्रिणा
ब्र० रामनगीना शर्मणा च संस्कृतः ।

प्रकाशकः—
ब्रह्मचारी रामनगीना शर्मा ।

आश्विन-पूर्णिमा २०१४]   [मूल्यं-सपादरूप्यकम् ।
१.६० पैसे

प्रथम संस्करणम् ।

वाराणसेयबाँसफाटकस्थसरलाप्रेसेमुद्रितम् ।

१९५७ ख्रीस्ताब्दे ।

❋ समर्पणम् ❋

अनन्तकालत ऋषि-महर्षि-महापुरुष-संवर्द्धित-संस्कृति-संस्कृत-सेवापरायणानां गाधिपुरमण्डलान्तर्गतरेवतीपुरस्थब्रह्मर्षिसंस्कृतादर्शमहाविद्यालयसंस्थापकसञ्चालकानाञ्च तत्रत्यग्रामाभिजनानां पूज्यचरणानां महात्मनां **श्रीमहावीरशर्मणां** करकमलयोरिदम्—

अहह कथमिदानीमस्य सल्लक्षणानि
विविधपद-निबन्धैरत्र सङ्कीर्तयानि ।
सततममरभाषा-सेवया सद्दिनानि
गमयत इह "रेवत्या" मुदर्कं शुभानि ॥

अहमवितमहावीरस्य चित्त-"प्रकाशम्"
अतिविनयसमेतोऽदभ्रवित्त-प्रदातुः ।
रति-पति-रिपुध्यानं कुर्वतश्चार्पयामि
रवि-किरणकणाभं हृत्तमः कालयन्तम् ॥

समर्पकः—

ब्रह्मचारी रामनगीना शर्मा

❀ किञ्चित्प्रास्ताविकम् ❀

अयि सुरभारती-समुपासकाः !

नाविदिता भवतां व्याकरणाम्बुध्यगाधता ।" तत्राप्यास्ते लघुशब्देन्दुशेखरो वै शेखरायितोऽनूनकानन्तरत्नानाम् । अस्माभिरप्यत्र गवेषयद्भि र्नावालोकि कश्चनेक्षण-प्रकाशः-प्रकाशन-क्षेत्रे परीक्षान्तरोत्तालतरङ्गान्दोलितचेतस्कैरितिसङ्कशुका आशु शङ्का-शङ्कुमुत्खातुं निःशङ्कमुत्केभ्यो गुणेभ्य तत्रभवद्भ्यो गुरुपादपद्मेभ्यः श्री शुकदेवझोपाध्यायेभ्यो यं प्राशांशु-लेशं समवाप्य हृच्चक्षुः समानन्दयाम तमेव "प्रकाशं" सिक्थक-वर्तिका-संकाशं नातिखरं, नेत्ररुजाक्रान्तानामपि शान्तिप्रदं, भवतां करकमलयो र्ददाना निकामं प्रसीदामः परीक्षार्थिनाम् । नेदिष्ठेऽपि दिष्टे ह्येनं सम्वीक्षमाणाः परीक्षादित्सवो नूनं प्राथम्यं समुपलप्स्यन्ते ।

समुपनिबध्नतो मे क्वापि स्खलतिस्स्यान्निसर्गतो व्यपनेयाऽसौ गुणगण-ग्रहण-पक्षपातिविपश्चिद्भिरिति विज्ञापयति—

विदुषां विधेयः—

श्रीभागीरथप्रसादत्रिपाठी

व्या० सा० वे० शास्त्री, बी० ए०, सा० रत्नम् ।

॥ ओम् ॥

शब्देन्दुशेखरप्रकाशः

पायाच्छम्भुः सुरेशोऽहितदलमथनः सज्जन-व्रात-सङ्गः
दुःख-ज्वालापहारी गणपति-जनकश्चाशुतोषो महेशः ।
एतस्याखण्डकार्यं त्वनिशमहिधरो यातु निर्विघ्नमन्तम्
इत्थं मामेकदीनं समगुण-रहितं ज्ञानहीनं मृडीकः ॥

अथ संज्ञाप्रकरणम् ।

१—अइउण ।

ननु संज्ञा च परिभाषा च विधिर्नियम एव च । अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणमित्यभियुक्तोक्तेषु षड्विधसूत्रेषु 'अइउण्' इत्यादि किं सूत्रमिति चेत् सत्यम् ! एषां सूत्राणां क्रमबोधकत्वेऽपि "आदिरन्त्येन सहेते"ति सूत्रैकवाक्यतया शक्तिनियामकत्त्वेन संज्ञासूत्रत्वम् । शास्त्रे सर्वत्र क्रमस्य संज्ञाद्वारैवोपयोगात् । स्वौजसित्यादीनामादिरन्त्येनैकवाक्यतया सुबादिसंज्ञासूत्रत्वम् । स्वादिविधायकत्वाद् विधिसूत्रत्वञ्च । न च षड्विधं सूत्रलक्षणमिति सिद्धान्तासंगतिः, स्वसमभिव्याहृतपदार्थतावच्छेदकव्याप्यमिथोविरुद्धयावद्धर्मबोधनस्य विधापदार्थत्वेन स्वौजसित्यादौ विधिसूत्रत्वसंज्ञासूत्रत्वयोः रूपत्वेनपरस्परविरुद्धत्वाभावेन विधापदार्थत्वानुपपत्तेरिति वाच्यम्, स्वसमभिव्याहृतपदार्थतावच्छेदकव्याप्यव्याप्यव्यापकभावानापन्नयावद्धर्मबोधनस्यैव विधापदार्थत्वात् । नच गुणाद्यापत्तिर्दुर्वारेति वाच्यम्, संहिताया अविवक्षितत्त्वेन संहिताकार्याप्राप्तेः । नच क्रमबोधकत्वरूपार्थवत्त्वात् प्रातिपदिकसंज्ञायांस्वाद्युत्पत्तिः कुतो नेति वाच्यम्; अनुकार्यानुकरणयोरभेदविवक्षापक्षे सादृश्यज्ञानाधीनानुकार्योपस्थितावपि वृत्तिज्ञानाधीनोपस्थितेरभावेन प्रातिपदिकसंज्ञाया अप्राप्तेः । नचैषामनुकरणत्वेप्रमाणाभाव इति वाच्यम्, सौत्रत्वेनानुकरणत्वसम्भवात् । वर्णात् कार, इत्यनेन कार प्रत्ययस्य न प्राप्तिः, रोगाख्यायां ण्वुल् बहुलमित्यतो बहुलग्रहणस्य तत्र सम्बन्धात् । अविकृताकारादिषु गृहीताजादिपदशक्तिः स्वोपजीव्याविकृतत्वविघातक

(आद्गुणः), इत्यादिप्रवृत्तिं प्रति निमित्तं न भवतीति सन्निपातपरिभाषया नात्र सन्धिरिति केचित्, तन्न । पुनरच्पदस्यार्थान्तरे शक्त्यग्रहेण तद्विरोधाभावात् । नच सन्धौ संदेहः स्यादिति वाच्यम् । व्याख्यानत एव तन्निवृत्तिसम्भवादिति दिक् ।

२—माहेश्वराणि सूत्राणि ।

ननु चतुर्दशसूत्रेषु 'अक्षरसमाम्नाय' इति भाष्यादौ कृतो व्यवहारोऽनुपपन्नः । आम्नायसमाम्नायशब्दयोर्वेदे एव प्रसिद्धेरिति चेन्न ! येनाक्षरसमाम्नायमधिगम्य-महेश्वरात्, नृत्तावसाने नटराजराजो ननाददक्कां नवपञ्चवारम् । उद्धर्तुकामः सनकादि सिद्धानेतद्विमर्शे शिवसूत्रजालम् । अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम् । धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये ॥ इत्यादि प्रामाण्यान्महेश्वरप्रसादात् पाणिनिना लब्धैषा चतुर्दशसूत्री श्रुतिरेव । एवञ्चानादित्वेन श्रुतित्वात् तद्व्यवहारोपपत्तेः । श्रुतिमूलकत्वात् पाणिनीयव्याकरणस्यैव वेदाङ्गत्वम् । नच लण्सूत्रे णकार-विषयाचार्यप्रवृत्ति र्ज्ञापयतिभवत्येषा परिभाषा व्याख्यानत इतिग्रन्थासंगतिरिति वाच्यम्; अनुबन्धानां महेश्वर कृतत्वेन आचार्यपदेन महेश्वरस्य ग्रहणात् । नचानुबन्धानां महेश्वरकृतत्वेन 'अमङ्णनम्' इत्यत्र मकार प्रत्याख्यानासंगतिरिति वाच्यम् । अदृष्टप्रयोजनसत्त्वेऽपि दृष्टप्रयोजनं नास्तीति तदाशयात् । तदुक्तं महाभाष्ये "सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्" । किञ्चिद् दृष्टादृष्टार्थवत् । किंचिच्छुद्धादृष्टार्थवत् सर्वथाऽनर्थकं न किञ्चिदिति तस्यार्थः । वर्णेनाप्यनर्थकेन न भवितव्यं किं पुनः महता सूत्रेणेति भाष्ये बोध्यार्थराहित्य-रूपस्यानर्थकेन ग्रहणम् । चतुर्दशसूत्र्या वेदत्वादेव, सोऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिरिति भाष्यमुपादाय यथैवेदमव्युच्छिन्नं चन्द्रतारकादि, एवमस्याक्षरसमाम्नायस्य न कश्चिदाधुनिकः कर्त्तास्ति । एवमेव वेदपारम्पर्येण स्मर्यमाण इति भर्तृहरिकथनं संगच्छते । अनुबन्धकरणार्थश्च—वर्णानामुपदेश इति भाष्ये करणशब्दप्रयोगेणानुबन्धानां सादित्वं तद्व्यतिरिक्तस्य सर्वस्यानादित्वं सूचितम् । ऋक्तन्त्रव्याकरणे इदमक्षरच्छन्दो वर्णशः समनुक्रान्तम् । यथा—आचार्याऊचु र्ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रोभरद्वाजाय, भरद्वाज ऋषिभ्यः ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षर समाम्नायमिति कथयन्ति । न भुक्त्वा, न नक्तं प्रब्रूयाद् ब्रह्मराशिरिति शाकटायने-

न्योक्तम् । नच भाष्ये उपदेशव्यवहारेण वर्णानां सादित्वापत्त्या कथमनादित्वमिति वाच्यम् । मंत्रोपदेशवदिह सिद्धोच्चारणेऽपि तद्व्यवहारादिति दिक् ।

३—लण्सूत्रेऽकारश्च ।

ऋॣवर्णयोः सावर्ण्यात् प्राल्कारीयतीत्यादौ रपरत्वं स्यादित्याशंक्य लपरत्वं वक्ष्यामीति भाष्ये उक्तम् । वक्ष्यामीत्यस्य रप्रत्याहारेण व्याख्यास्यामीति तुल्यास्य सूत्रस्थकैयटोक्त्यालण्सूत्रघटकाकारोऽनुनासिकस्तेनेत्संज्ञायां रप्रत्याहारसिद्धिरिति प्राचां मतम् । नागेशमतेतु लण्सूत्रघटकाकारो नानुनासिकः । अतोल्लान्तस्येतिसूत्रे लकारोच्चारणात् । अन्यथा रप्रत्याहारेणैव सकलेष्टसिद्धौ लकारोच्चारणवैयर्थ्यापत्तिः । किञ्च लण्सूत्रघटकाकारस्येत्संज्ञकत्वे यण्पदघटित सूत्रेषु णकारोच्चारणवैयर्थ्यापत्तिः । यप्रत्याहारेणैव निर्वाहात् । नचातोल्लान्तस्येति सूत्रे लकारोच्चारणेनाजनुबन्धप्रत्याहारस्यानित्यत्वज्ञापनात्, रात्सस्य, योऽचीत्यादौ न प्रत्याहारग्रहणम् । इकोयणचीत्यादौ णकारोच्चारणमपि नानर्थकमिति वाच्यम् । प्रत्याहारेष्वनुबन्धानां कथमज्ग्रहणेन ग्रहणं नेत्याशंक्य, आचारात्, अप्रधानत्वात्, लोपश्च बलवत्तर इति तृतीयहेतोः पक्षतावच्छेदकाव्यापकत्वे भागाऽसिद्धया भाष्यासंगतेः । तथाहि—अनुबन्धाः स्वेतरो यःस्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नस्तदबोधकप्रत्याहारजन्यबोधविषयत्वाभाववन्तः, तस्य लोप इति शास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वात् । प्राचीनमते लोपस्य बलवत्वेऽपि हल् प्रत्याहारसिद्धेः प्रागच् पदार्थ निष्पत्त्यभावेनोपदेशेऽजनुनासिक इत्यस्य वाक्यार्थाभावेन लण्घटकाकारस्येत्संज्ञालोपयोरभावेन हेतोरव्यापकत्वापत्तिः । हल् प्रत्याहारेऽनुनासिकाकारस्य प्रवेशे मामाँस्त्रायस्वेत्यत्रानुस्वारापत्तिश्च । नचानुनासिकाकारस्यानण्त्वात् तेन दीर्घसानुनासिकग्रहणं कथमिति वाच्यम्; प्रत्याहारे जातिपक्षस्यैव भाष्येसिद्धान्तितत्वात् । सोऽस्तीत्यादौ सुलोपापत्तिश्च । अतएवभाष्ये प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु नेति शंका अच्प्रत्याहारे एव कृता न हल्प्रत्याहारे । नच हशादिप्रत्याहारे ट्र ग्रहणापत्तिरिति वाच्यम्; हकारादिषु पुनः पुनरकारोच्चारणेनोच्चारणार्थवर्णरहितहलां तद्घटितप्रत्याहारे ग्रहणाभाव बोधनात् , तस्मात् "उरण्रपरः"इत्यत्र लग्रहणं कर्त्तव्यमेवेति नागेशाशयः ।

४—हलन्त्यम् ।

ननु "न विभक्तौ तुस्मा ' इत्यादेः सार्थक्याय हलन्त्यमित्यस्योपदेशेऽन्त्यं हल्

इदित्यर्थस्वीकारस्याऽऽवश्यकत्वेन हलन्त्यम्, आदिरन्त्येनेति सूत्रयोः परस्परापेक्षत्वेनान्योन्याश्रयात्, लकारे इत्संज्ञामबोधयित्वा हलामित्संज्ञाविधानमयुक्तम्। नच हयवरेत्यादेरावृत्त्या शषसरित्यन्तं समुदायमुद्दिश्य हलित्यनेन हल् संज्ञाया अपि विधानान्नदोष इतिवाच्यम्, दशसूत्रावृत्तौ गौरवात्। नचोपदेशे इदन्त्यम्, अच्, अनुनासिक इति सूत्रत्रयमस्तु, हलन्त्यम्, उपदेशे अजनुनासिक इति सूत्रद्वयाकरणे लाघवात्। उपदेशेऽन्त्यमिदिति प्रथमयोगार्थः। अन्त्यस्याचः पूर्वेणैव सिद्धौ द्वितीय योगोऽनन्त्यार्थः; तृतीय योगेऽजित्यनुवर्त्यानुनासिकोऽजित्यर्थः। नच द्वितीययोगेन रुधातुघटकोकारस्येत्संज्ञापत्तिरितिवाच्यम्। अनुनासिक इति—योगेनाचश्चेदिद्भवति तर्ह्यनुनासिकाच एवेतिज्ञापनात्। नन्वेवमपि प्रथमयोगेन तत्रेत्संज्ञा दुर्वारेति चेन्न, योगविभागसामर्थ्यादनन्तरस्येति न्यायं बाधित्वाऽऽद्ययोगस्याऽपि नियमेन व्यावृत्तेः। अनुनासिकश्चेदिद् भवति तर्ह्यच एवेति विपरीत नियमस्तु न सम्भवति। मिदचोऽन्त्यादिति सूत्रारम्भसामर्थ्यात्। अपाणिनीयन्तु भवतीतिभाष्यात् पाणिनिसूत्रभेदे पारायणादावदृष्टहानिस्तु न शङ्क्या, कल्प्यमान न्यासस्य लघुत्वेऽस्यादोषत्वात्। तदुक्तं भाष्ये—सूत्रभेदं तमुपाचरन्ति यत्र तदेवान्यत् सूत्रं क्रियते, भूयो वा यदि तदेवोपसंहृत्य क्रियते नासौ सूत्रभेद इति। सति सम्भवे दृष्टद्वारैवाङ्गानामदृष्टार्थत्वम्। एवञ्च हल्ग्रहणमपि व्यर्थमन्योन्याश्रयश्च नेति वाच्यम्। योगविभाग, नियम, ज्ञापकाश्रयणे मात्रापदगौरवाभावेऽपि ज्ञानगौरवस्य दुर्वारत्वात्। न च सह आसमन्तात् एति गच्छति सहेता मध्यमोवर्ण इत्यर्थस्वीकारान् नान्योन्याश्रय इतिवाच्यम्। योगमर्यादया सहेताशब्दस्यैतादृशार्थालाभात्, अन्योन्याश्रयमाशङ्क्य प्रकारान्तरेण तत्परिहारकथन परभाष्याऽसङ्गतेश्च। तस्मात् सूत्रावृत्त्याऽन्योन्याश्रयः परिहरणीयः। भाष्येऽप्यन्योन्याश्रयमाशङ्क्य, हलन्त्यमित्संज्ञकं भवति, लकारश्चेद् भवतीत्युक्त्वैकशेषनिर्देशाद्वा सिद्धमित्युक्तम्। नचैवमपि "न विभक्तौ तुस्माः" इति विभक्तिपदबोध्यसुप्तिङ्बोधो हलन्त्यमिति वाक्यार्थबोधाधीनः, तद्बोधश्च न विभक्तौ इति वाक्यार्थ बोधाधीन इत्यन्योन्याश्रयस्तदवस्थ एवेतिवाच्यम्; अपवादवाक्यार्थबोधात् पूर्वं पदपदार्थोपस्थितावुत्सर्गवाक्यार्थबोधे बाधकाभावात्। "न विभक्तौ तुस्माः" इति सूत्रस्थ तुस्म पदार्थज्ञानमात्रेण पादीनामपवादशास्त्रविषयत्वाभावेन तेषु हलन्त्यसूत्रप्रवृत्त्या सुप्तिङ्रूपविभक्तिपदार्थज्ञानसम्भवाच्चेति दिक्।

५—आद्योच्चारणमिति ।

प्राचीनमते उपदेशनमुपदेश इतिभावे घञ् । आद्यमुच्चारणमित्यर्थः । आद्यत्वञ्च—अज्ञातस्वस्वरूपज्ञापकत्वम् । उपस्याद्यर्थत्वात् । दिशेरुच्चारणक्रियत्वात् । अतएवेत्संज्ञाविधावुच्चारणवचन उपदिशिर्ग्रह्यते इतिकैयटोक्तिः संगच्छते । आदेच इतिसूत्रेऽपि येषां स्वरूपज्ञापनायापूर्वमुच्चारणं तेषामेवोपदेश-व्यवहार इति । तत्रसूत्रेभाष्येऽपि उद्देशश्च प्रातिपदिकानां नोपदेश इति। उपदेशेऽजनुनासिक इति सूत्रेभाष्येऽपिप्रत्यक्षमाख्यानमुपदेशः, गुणैः प्रापणमुद्देश इति प्राचां मतम् ।

नागेशमते—उपदिश्यतेऽनेनेति करणे घञ् । धातुप्रातिपदिक, प्रत्यय, निपातागमादेशा इति तदर्थाः । तथाहि—उपदेशे इति किमर्थम्—अभ्र आँ अपः । कः पुनरुद्देशोपदेशयोर्विशेषः । यदिप्रत्यक्षमाख्यानमुपदेशः, गुणैः प्रापणमुद्देशस्तर्हि "लृटःसद्वा", निष्ठेतिविहितशतृशानच् क्तक्तवतूनामवयवस्ये-त्संज्ञानापत्तिः । एवंराजसूयसूर्य चित्याग्निचित्येत्यादिनिपातनानुमितक्यबादीनां पादेरित्त्वानापत्तिः, प्रत्यक्षाख्यानाभावात् । न च वदः सुपिक्यप्चेत्यत्रोच्चारित-स्यैव तत्रानुमानान्नदोष इति वाच्यम् ; अनुवृत्त्यादिकं विना अन्यस्यासम्बन्धित्वात् । लोकव्यवहारेऽमुष्मिन्नवकाशे हस्तदक्षिणोग्राह्यइति गुणैः प्रापणे उपदिष्टो मेपन्था, इषेत्वकाद्याख्याने उद्दिष्टोमेऽनुवाक इतिसंकीर्णत्वमुपपाद्य वार्तिककारैरुपदेशनेऽजनु-नासिक इतिवक्तव्यम् । किं पुनरुपदेशनं शास्त्रमित्युक्तम् , शास्त्रपदेन प्रयुज्यमानस्य परिनिष्ठितत्वसम्पादने करणभूता धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः" हलन्त्यसूत्रे व्यवसितपदार्थत्वेन भाष्ये गृह्यन्ते । एवञ्च न पूर्वोक्तापत्तिः । भाष्ये बाहुलकात् करणेघञि, सूत्रेणैवोक्तार्थसिद्धिं कृत्वा तद्वार्तिकं प्रत्याख्यातम् । किञ्च प्राचीनमते हलन्त्यमित्यत्र भावघञन्तोपदेशपदानुवृत्तौ भवतष्ठक्छसाविति विहितठकः ककारस्ये-त्संज्ञानुपपत्तिः, परस्यसत्त्वेन कादेरन्त्यत्वाभावात् । उपदेशे प्रत्ययत्वादिविशिष्टान्त्य इदित्यर्थे सूत्रे उपदेशपदानुवृत्तिर्व्यर्था स्यादन्त्यपदसामर्थ्येनैव तल्लाभात् । नच-करणसाधनपक्षेयत्किञ्चित् समुदायान्त्यस्येत्वापत्तिवारणाय हलन्त्यसूत्रे व्यवसिता-न्त्यमिति वक्तव्यम् । के पुनर्व्यवसिताः—धातु, प्रातिपदिक, प्रत्ययनिपातागमादेशा इति वार्तिकाद्यनुत्थानप्रसङ्गः । हलन्त्यसूत्रे करणघञन्तोपदेशपदानुवर्तनादिति-वाच्यम् ; समुदायद्वाराऽवयवस्याप्युपदेशकरणत्वात् , तदन्त्यस्यापि लोपापत्तिरि-

त्याशयेन तदुपपत्तेः। अन्त्यग्रहणसामर्थ्येन तत्प्रत्याख्यातं भाष्यकृता। किञ्चोदश्विदादि प्रातिपदिकान्त्यस्येत्वापत्तिवारणाय प्रातिपदिकानां प्रतिषेधोवाच्योऽकृत्तद्धितान्तानामिति वचनं वार्त्तिककृतोक्तम्। तितिप्रत्ययग्रहणमितिवचनेन तित्स्वराप्राप्त्याफलाभावात् तद्वार्तिकं भगवता प्रत्याख्यातम्। प्राचीनमतेऽस्यवार्त्तिकस्यानुत्थानमेवस्यात्। उद्देशश्च प्रातिदिकानां नोपदेश इतिभाष्योक्तेः। नचाग्रहण प्रातिपदिकानामप्युपदेशः कर्त्तव्यो मञ्चको मञ्जक इति माभूदिति भाष्यविरोधपरिहारः कथमिति वाच्यम्। तत्रोपदेशशब्दस्य ग्रहणार्थकत्वात्। नचैवमपि षष्ठीप्रकल्पकत्वपक्षे गुप्तिज्किद्भ्य इत्यत्र तस्मादित्युत्तरस्येतिसूत्रेण सन् इति प्रथमायाः षष्ठीप्रकल्पनादान्तरतम्यात् सनः सनादेशेऽपि नकारस्येत्संज्ञानुपपत्तिरुपदेशाभावादिति भाष्यासंगतिरितिवाच्यम्। तद्भाष्यस्यैकदेशित्वेनादोषात्। एवञ्चोपदिश्यतेऽनेनेति करणे घञ् भाष्यवृत्त्यादिषु व्याख्यातम् तत् प्रौढवादमात्रमिति मनोरमोक्तं नोचितम्। एकदेशिभाष्यबलेन प्रौढिवादत्वकथनाऽसंभवात्। लक्ष्यासिद्धेश्च। अइउण्, इत्यादीनामपि क्रमबोधकत्वेनार्थवत्वात् प्रातिपदिकत्वम्। एवं चित्रङः चोः कुरित्यादेरपि। लोपश्चेत्यत्रापि शकारस्य स्वरूपेणार्थवत्वात् प्रातिपदिकत्वम्। एकाच उपदेशे, आदेच उपदेशे इत्यादौ तु भावसाधनपक्ष एवेतिदिक्।

६—ऊकालोऽच्।

ननु वर्णसमाम्नाये कण्ठादिक्रमसत्त्वेन "आकालोऽच्" इति सूत्रनिर्देश उचित इति चेन्न, कुक्कुटरुते उकारे एकद्वित्रिमात्रत्वस्य स्पष्टतया प्रतीतिदर्शनेन तदनुक्तेः। अत्र सूत्रे ह्रस्वदीर्घप्लुतोकाराणां क्रमेण प्रश्लेष-निर्देशो भाष्यव्याख्यानात्।

ऊ पदस्य स्वोच्चारणकालसदृशे लक्षणया 'उ' एतदुच्चारणाधिकरणकालसदृशकालो यस्याचः स ह्रस्वसंज्ञः इति सूत्रार्थः। एवं दीर्घादावपि। नचैवं ह्रस्वघटितवाक्येऽणत्वात् सवर्णग्रहणे द्वित्रिमात्रयोरपि ह्रस्वसंज्ञायां प्रदायेत्यादौ तुगापत्तिरितिवाच्यम्, ऊ अजित्येव सूत्रमस्तु तस्य स्वत एवाच्त्वात् अच् ग्रहणमुसदृशोऽजित्यर्थलाभार्थम्, सादृश्यस्य व्याख्यानात् कालकृतस्यैव ग्रहणेन सकलेष्टसिद्धौ सूत्रे कालग्रहणेनोच्चारितसम्बन्धिकालसदृशकालस्यैव संज्ञा नतु गृहीतसम्बन्धिकालसदृशकालस्यापीति ज्ञापनात्। अत एव यावत्तरकरणं तावदन्न

कालग्रहणमिति भाष्योक्तं संगच्छते । न च वर्णग्रहणे जातिग्रहणमिति परिभाषया सूत्रेऽच्पदेनाच्त्वावच्छिन्नस्य ग्रहणात् तितउच्छत्रमित्यत्र दीर्घात् पदान्ताद्वेति तुगापत्तिरिति वाच्यम्, तस्या ज्ञापकसिद्धत्वेनासार्वत्रिकत्वात् । अन्तरङ्गत्वान्नित्यतुक एव प्राप्तेश्चेति दिक् ।

७ तुल्यास्यप्रयत्नंसवर्णम्

तुल्यश्च तुल्यश्चेत्यर्थतंत्रम् । नात्रैकशेषः, शब्दतन्त्रे एव तत्प्रवृत्तेः । तुल्यौ, आस्यप्रयत्नौ यस्येति बहुव्रीहिस्तथा च यज्जनकौ आस्यप्रयत्नौ यज्जनकास्यप्रयत्नाभ्यां तुल्यौ तौमिथः सवर्णसंज्ञौ स्त इति सूत्रार्थः । आस्यपदोपादानादास्येभवमास्यमिति तद्धितान्तं गृह्यते । तथा च वर्णोपयोगित्वादास्यपदेन स्थानस्य ग्रहणम्, प्रयत्नस्यपृथगुच्चारणात् । वर्णोत्पत्त्यव्यवहितप्राग्भावितत्वरूपप्रकर्षाश्रयणात् प्रयत्नशब्देन आभ्यन्तरस्य ग्रहणम् । न च दैत्यारिरित्यादौ स्थानस्यैक्यात् तुल्यत्वस्यभेदघटितत्वपक्षे-सावर्ण्याप्रसक्त्या कथंदीर्घइति वाच्यम्; तत्तत्कार्यगतभेदस्य स्थानेष्वारोपेणतदुपपत्तेः । शिक्षायां कण्ठादीनां कण्ठत्वादिनैव स्थानत्वप्रतिपादनात् तद्रूपेणैवास्यपदेनग्रहणमिति तद्भागभेदमादायोदात्तादिषु सावर्ण्यानुपपतिर्न । नचैवमपि वलयोः सावर्ण्यापत्तिः, दन्तस्थानसाम्यादिति वाच्यम्; यजुष्येकेषामितिनिर्देशेन यावदास्यभवतुल्यत्वस्यग्रहणात् । अतएव तद्वानासामित्यादौ तोर्लीत्यनेन परसवर्णाभावः सिद्धः । अतएव प्रयत्नं प्रयत्नइतिपक्षे झरोझरीतिसूत्रे सवर्णग्रहणेनयत् किञ्चित् प्रयत्नभेदेऽपि यत् किञ्चित् प्रयत्नैक्यमादाय सवर्णसंज्ञेति ज्ञापनात् स्थानांशे यावत् स्थानसाम्ये एव सवर्णसंज्ञा । नच यावदास्यभवतुल्यत्वग्रहणे सूत्रे प्रयत्नपदोपादानं व्यर्थम् । प्रयत्नस्याप्यास्यभवत्वादिति वाच्यम्; आस्यभवानां कण्ठादीनामेवग्रहणमिति बोधनाय तस्यावश्यकत्वात् । अत एव ह्रस्वदीर्घयोः सावर्ण्यसिद्धिः । अन्यथा तयोर्जनकानामास्यभवानां वायुसंयोगानामतुल्यत्वात् सावर्ण्यासिद्धिः । स्वजनकस्थानप्रयत्नजन्यत्व, स्वाजनकस्थानप्रयत्नाजन्यत्वोभयसम्बन्धेन वर्णविशिष्टत्वं यावदास्यभवतुल्यत्वम् । नचैवमेकारेण सह इकारस्यसावर्ण्यापत्तिरितिवाच्यम् । आद्यसम्बन्धे यावत्पदनिवेशेनादोषात् ।

८—ञमङणनानां नासिका च ।

अत्र चेन स्वस्ववर्गानुकूलं ताल्वादिस्थानं गृह्यते । अतएव—ञमङणनानां नासिकायां भवइत्यर्थकनासिक्यशब्देन व्यवहारः प्रातिशाख्ये कृतः । यत्तु—

अनुस्वारयमानाञ्च नासिकास्थानमिष्यते इति शिक्षावचनादेषां नासिकाकरणं, नतु स्थानम्। स्थानत्वस्वीकारे कङयोःसावर्ण्यानुपपत्तिः, यावदास्यभवतुल्यत्वाभावात्। यत्किञ्चित्स्थानैक्यमादाय सवर्णसंज्ञास्वीकारे तु ञमामपि परस्परं सावर्ण्यापत्तिरिति तन्न। अस्यन्ति वर्णान् अनेनेति भाष्यात् कण्ठादीनामपि करणत्वस्यैवप्रतीतेः। न च स्थानत्वव्यवहारः कथमिति वाच्यम्। वर्णाभिव्यक्तिजनकताल्वादौ वर्णजनक वायुसंयोगाधारे च वर्णाधारत्वारोपेण तदुपपत्तेः। तत्तत्स्थानजिह्वाग्रादिसम्बन्धेन वर्णोत्पत्त्या जिह्वाग्रादौ तत्सम्बन्धजनकस्पृष्टतादौ च करणत्वव्यवहारोपपत्तिः। गुणपदेन बाह्य प्रयत्नग्रहणम्, सावर्ण्यानुपयुक्तत्वात्, आन्तरतम्यपरीक्षोपयोगित्वाच्च। अकारादिनिष्ठाऽनुनासिक्यस्यगुणत्वेन व्यवहारस्तु कण्ठत्वाद्यवच्छिन्नवायुसंयोगेन उत्पन्नेषु नासावच्छिन्नवायुसंयोगेन तद्रूपधर्मोत्पत्त्या भाष्यादौ कृतः। ङादीनां कण्ठनासावच्छिन्नवायुसंयोगोत्तरमेवस्वरूपोत्पत्त्या विनिगमनाविरहेणोभयोः-स्थानत्वम्। नचानुस्वारयमानाञ्चेति शिक्षाविरोध इति वाच्यम्। चेन ङादीनामपि ग्रहणात्। ङादीनां तत् स्थानत्वादेव कण्ठ्योऽकार इत्युक्त्वा नासिक्यात् नासिक्ययमानुस्वारान् इतिस्थानानीत्युक्तं प्रातिशाख्ये ञमङणनमाः नासिक्या इति तद्व्याख्यातृभिरुक्तम्। नच यावदास्यभवतुल्यत्वाभावात् कङयोः कथं सवर्ण संज्ञेति वाच्यम्। तुल्यास्येतिसूत्रे लौकिकास्यग्रहणे जबगडदानां सावर्ण्यमाशंक्य—आस्ये तुल्यदेशप्रयत्नंसवर्णमिति वार्तिककृतोक्तम्। तत्र किमास्योपादानेप्रयोजनमिति-प्रश्नेप्रयत्नविशेषणार्थमास्योपादानमित्युक्त्वा तद्व्यावर्त्येनबाह्यप्रयत्नान् प्रदर्श्य यथा-तृतीयास्तथापञ्चमा आनुनासिक्यमेषामधिको गुण इतिभाष्येणाऽऽनुनासिक्यस्य बाह्यप्रयत्नोक्त्या तुल्यास्यसूत्रे नासिकाया आस्यशब्देन तत्रत्यप्रयत्नस्यच प्रयत्न-शब्देनाग्रहणबोधनात्। नासिका आस्याद् बाह्या इति मते दोषाभावश्चेति दिक्।

९– पूर्वत्रासिद्धम्।

अधिकारसूत्रमिदम्। तेनसपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रतिपरमसिद्धमित्यर्थः सम्पद्यते। अत एव गोधुङ्मानित्यत्र गोदुह्मदितिस्थिते-घत्वे कृते जश्त्वानुनासिकभष्भावेषु प्राप्तेषु पूर्वत्रैपादिकभष्भावदृष्ट्या जश्त्वा-नुनासिकयोरसिद्धत्वाद्भष्भावे ततो जश्त्वेऽनुनासिके च रूपसिद्धिः। अन्यथा घत्वेकृते नित्यत्वाज्जश्त्वं बाधित्वाऽनुनासिकेभष्भावानुपपत्तिः। नच घत्वे कृतेऽप वादत्वाज्जश्त्वं बाधित्वाऽनुनासिकंचान्तरङ्गत्वाद् बाधित्वा कृतेभष्भावे नोक्तापत्तिरिति

वाच्यम् । "झय" इत्यस्यप्रतिपदोक्तत्वेन वत्वापत्तेर्दुर्वारत्वात् । परत्वाज्जश्त्वानुनासिकयोस्तु न प्राप्तिः, यथोद्देशपक्षे त्रिपाद्यां विप्रतिषेधाप्रवृत्तेः । न च कार्यकालपक्षे त्रिपाद्यां विप्रतिषेधशास्त्रप्रवृत्तौ न दोष इतिवाच्यम् । पूर्वत्रासिद्धे नास्तिविप्रतिषेधोऽभावादुत्तरस्येत्यनेन तस्य यथोद्देशस्यैव बोधनात् । अधिकारत्वादेवश्चुत्वं धुटिसिद्धं वाच्यमितिचरितार्थम् । एवञ्च "होढ" इत्यत्र पूर्वत्रासिद्धमित्यस्योपस्थितौ वाक्यभेदेनान्वयः । हस्य ढो भवति, इदञ्च शास्त्रं पूर्वत्रासिद्धम् । अतएव "नमुने,, इत्यनेनशास्त्रासिद्धत्वनिषेध उपपद्यते । अत्रकार्यासिद्धत्वपक्षस्वीकारेऽमू इत्याद्यसिद्धिः । तथाहि—अद अ औ" इत्यवस्थायां परत्वान्मुत्वे तस्य सापादिकपररूपदृष्ट्याऽसिद्धत्वेऽपि देवदत्तहन्तृहतन्यायेन अकाराभावेनेष्टपररूपाद्यनापत्तिः । अतिदेशस्यारोपरूपत्वान्निरधिष्ठानारोपासम्भवेनात्रपक्षे कार्यप्रवृत्तेरावश्यकत्वात् । शास्त्रासिद्धत्वपक्षे तु यत्राप्यन्तरङ्गत्वात् त्रैपादिकं प्रवृत्तं तत्रापि तच्छास्त्रे एवाभावारोपेण तन्निवृत्तिबुद्धेरभावः, आदेशबुद्ध्यभावो लक्ष्येजातत्वबुद्ध्यभावश्च । जायमानं कार्यं तु आदेशे एव स्थानिबुद्ध्या प्रवर्तते । यत्र सहप्रसङ्गस्तत्राप्रवृत्तिरेवाभावारोपात् । वस्तुतस्तु नमुने इतिसूत्रारम्भेण देवदत्तहन्तृहतन्यायस्यानित्यत्वकल्पनादकार बुद्ध्योकारस्यैव पररूपे सन्नियोगशिष्टन्यायेन मयाऽपि निवृत्तौ पुनर्मुत्वेऽमू, अमीत्यादिसिद्धिः । नचामूभ्यामित्यादौ तद्घटकमात्रोद्देश्यकविकारसत्वात्, लक्ष्ये लक्षणमिति न्यायेन मुत्वं न स्यादिति वाच्यम् । नमुने इति निषेधेन लक्ष्ये लक्षणमिति न्यायस्याप्यनित्यत्वज्ञापनात् । एवञ्च कार्यासिद्धत्वपक्षेऽपि न दोष इतिदिक् ।

१०— अणुदित्सवर्णस्य चाप्रत्ययः ।

अणुदिच्च घटकतया सवर्णान् गृह्णातीति सूत्रार्थः । प्रतीयते विधीयते इति प्रत्ययो, न प्रत्ययोऽप्रत्यय इत्यस्य विधीयमानः सवर्णग्राहको न भवति । तेन त्यदादीनाम इत्यत्र न सवर्णग्रहणं, विधीयमानत्वादितिप्राचीनमतम् वस्तुतस्तु सूत्रेऽप्रत्ययादेशटित्किन्मित्सूपसंख्यानं कर्त्तव्यमिति वार्तिककृतोक्तेऽनभिधानात् प्रत्ययो न सवर्णग्राहकोभविष्यति । आदेशे ईहल्यघोरिति दीर्घोच्चारणाद्, वृतोवेति विभाषाग्रहणादागमेषु च सवर्णग्रहणाभावमुपपाद्याप्रत्ययग्रहणमेकदेशानुमत्या भाव्यमानेनेति परिभाषां ज्ञापयतीत्युक्तम् । प्राचीनमते भाष्यवार्त्तिकयोरसङ्गत्यापत्तिः । विधीयमानत्वेन सवर्णग्रहणाप्रसक्तेः । किञ्च "ज्यादादीयसः" इतिसूत्रेण अद्विधानेऽपि सवर्णग्राहकताबलात् "ईयसः' ईकारस्थाने दीर्घाकारसिद्धौ सूत्रे 'आद्' विधानं

भाव्यमानेनेति परिभाषाज्ञापकमुक्तं भाष्ये। प्राचीनमते विधीयमानत्वेन सवर्णग्रहणाप्रसक्त्या भाष्यासंगतिः स्पष्टैव। जातिपक्षप्राप्तं गुणाऽभेदकत्वेन च प्राप्तं सवर्णग्रहणं भाव्यमानपरिभाषया वारणीयम्। अतएव घटवदित्यत्र नानुनासिको वकार इतिदिक्।

११—तपरस्तत्कालस्य।

तः परोयस्मादिति बहुव्रीहिः। प्रमाणञ्चात्र – अतोभिस ऐस् इतिसूत्रे तपरकरणमेव। तात् परः तपर इति पञ्चमीसमासे, सहिवहोरोदवर्णस्येति सूत्रे वर्णग्रहणमेव, बहुव्रीहिमात्रस्वीकारे वर्णग्रहणवैयर्थ्यापत्तिः। कृते वर्णग्रहणे तु तत्सामर्थ्यात् सर्ववर्णग्रहणबोधनेन तपरसूत्राप्रवृत्तिः। बहुव्रीहिसमासोदाहरणमतोभिस ऐस्। पञ्चमीसमासोदाहरणं वृद्धिरादैजिति। नन्वत्र संज्ञातात्परा। न च तत्समकालस्तत्सवर्णोवा प्रसिद्ध इति वाच्यम्। तपरकरणसामर्थ्याद् भाष्यादिप्रामाण्याच्च तात्परवर्णसमानकालिकः, तात्परशब्दबोध्यो वर्णः स्वसमकालग्राहकइत्यर्थस्वीकारात्। सूत्रमिदं विध्यर्थमेव। अणग्रहणाननुवृत्तेः "अस्यच्वौ" इत्यादौ सावकाशमणुदित् सूत्रं बाधित्वा परत्वात् तपरसूत्रप्रवृत्तौ नातोभिस ऐस्' इत्यादावष्टादशानां ग्रहणम्। गुणा अभेदका" इति पक्षे त्वनवकाशत्वाद् बाधः। नचावध्यवधिमतोः साजात्येन वर्णस्यैव संज्ञाविधानात् कथं विशिष्टाद् विभक्तेरुत्पत्तिरिति वाच्यम्। सौत्रत्वात् तदुत्पत्तेः। जातिपक्षे तु सवर्णग्रहणानुवृत्त्या नियमार्थमेव। एवं गुणा अभेदका इति पक्षेऽपि नियमार्थमेव। नच "आद्‌गुणः" इत्यादौ तपरसूत्रप्रवृत्त्यापत्तिरिति वाच्यम्। "उपसर्गादृति धातौ" इतिसूत्रे तपरकरणेन विभक्तितकारेऽस्याऽप्रवृत्तिबोधनात्। "ऋदोरप्" इत्यादौ धकारस्थानिकदकारसत्त्वेन न तपरसूत्रप्रवृत्तिरितिदिक्।

१२—नवेति विभाषा।

इति शब्दो लोकेऽर्थपदार्थकस्य शब्दपदार्थकत्वं करोति। यथा गवित्ययमाह-अत्र सूत्रे स्वंरूपमितिशास्त्रबलात् शब्दपदार्थकस्य नवेतिशब्दस्य निषेधविकल्पार्थकत्वं करोति। क्वचिदितेर्नपदार्थविपर्यासकत्वं यथानुवादवाक्ये। भाष्यादिव्याख्यानादिति शब्दो नवाशब्दाभ्यां प्रत्येकं सम्बध्यते। तथा च नवाशब्दयोरर्थौ निषेधविकल्पौ विभाषासंज्ञिनौ। स्वरूपमितिप्रत्याख्यानपक्षे त्वितिशब्दो व्यर्थएव, अर्थेकार्यस्याबाधात्। "स्वंरूप" मितिसूत्रसत्त्वे इतिशब्दाभावे च नवाशब्दयोरेववि-

भाषा संज्ञाविधानाद् "विभाषाश्वे रि" त्यनेन श्वयतेः स्थाने नवाशब्दादेशापत्तिः। तद् वारणाय सूत्रे इतिशब्दः। प्राप्तविभाषासु नास्यप्रवृत्तिः, प्राप्तांशस्यसिद्धत्वेन पक्षे निवृत्तिमात्रफलकत्वात्। एवमप्राप्तविभाषास्वपि नास्यप्रवृत्तिः, अप्राप्तांशस्य सिद्धत्वेन पक्षे विधिमात्रार्थत्वात्, अप्राप्तत्वेन निषेधासम्भवाच्च। तस्मादुभयत्र विभाषार्थमिदम्। यथा—"विभाषाश्वे"रित्यादौ। एतत्सूत्राभावे यद्यस्य विधिमुखेन प्रवृत्तिस्तदापिस्त्वेव प्रवर्तेत, निषेधमुखेन प्रवृत्तौ किस्त्वेव, उभयमुखेनप्रवृत्तिस्तु नैव सम्भवति। वैरूप्याद् वाक्यभेदापत्तेश्च। सूत्रसत्त्वे तु श्रुतक्रमानुरोधात् पूर्वं किस्तु निषेधस्तदनन्तरं किदकिद्रूपे शिव्यैक्यरूपं प्रापितेसति पक्षे भवत्येकरूपेण विधिमुखेनैव विकल्पः। भाष्यकारस्तु अन्यतरस्यामुभयथा एकेषामित्यादि पदघटितसूत्रेष्वस्याप्रवृत्तिर्विभाषापदाभावात्, इतिशब्दस्य विभषेत्यत्रापि सम्बन्धं कृत्वा "विभाषापदार्थः संज्ञे"ति तु न युक्तम्। अर्थे संज्ञात्वस्यादृष्टत्वात्। अर्थाक्षिप्तशब्दमात्रंसंज्ञेत्यपि न युक्तम्। "अनाकृतिः संज्ञे"ति भाष्येणै-कस्यार्थस्य समानफलकानेकसंज्ञाकरणस्य तिरस्कारात्। तस्माद् "हृक्रोरन्यतरस्या" मित्यादौ लक्ष्यानुसारेणैवोभयमुखेन यथाप्रवृत्तिः। एवं विभाषापदघटितेऽपि प्रवृत्तिः स्यादेवेति सूत्रमिदं प्रत्याख्यातवान्। वस्तुतस्तु निषेधविकल्पौ विभाषासंज्ञौ इति तात्पर्येण नवाविभाषेति वाक्यस्य निराकांक्षत्वम्। अतएव "निषेधः पदार्थो" विकल्पः प्रमेय" इत्यादि तात्पर्येण न पदार्थो वा प्रमेय इत्यादि न प्रयुज्यते। इतेरेवसर्वनामत्वेन निषेधविकल्पार्थकत्वं, नवेति तात्पर्यग्राहकम्। अतएव "नारद इत्यबोधिसः", इत्यादौ नारदपदान्न द्वितीया। इतिपदमेव नारदार्थकम्। नारदपदं तात्पर्यग्राहकम्। एवञ्च स्वंरूपमित्यस्य प्रत्याख्यानेऽपीतिशब्दस्यावश्यकत्वमिति दिक्।

१३—स्वंरूपंशब्दस्याशब्दसंज्ञा।

शब्दस्य स्वंरूपं बोध्यं शब्दशास्त्रे यासंज्ञा तां विना। "गामानये"त्यादौ लोके यद्यप्यर्थस्यैव प्राधान्यं तथापि "राज्ञोयदि"त्यादावर्थस्य प्रत्ययेन पौर्वापर्यासम्भवात्, प्रातिपदिकादित्यनेनान्वयासम्भवाच्च, राजरूपार्थवाचकनृपादिशब्दाद् यत् प्रत्ययापत्तिवारणाय सूत्रमिदं नियमार्थम्। स्वशब्द आत्मीयत्वेनार्थमाह रूपशब्देन स्वरूपमेतदुभयंशब्दस्य संज्ञी। तत्र शब्दशास्त्रेऽर्थे कार्यस्य बाधात् शब्दस्यैव विशेष्यत्वम्। अर्थो विशेषणं, तथाचार्थविशिष्टः शब्दः शब्दस्य संज्ञीत्यर्थादर्थवद्ग्रहणपरिभाषा फलितार्थसिद्धा। अत्रार्थः कल्पितान्वयव्यतिरेककल्पितः प्रकृतिप्रत्यादि

बोध्यः शास्त्रीयोऽपिगृह्यते । सच मुख्यः प्रसिद्धश्चेति गौणमुख्यन्यायः, "अभिव्यक्त पदार्था ये" इति न्यायश्च सिद्धः । अतएव इयं विशिष्टरूपोपादाने एव प्रवर्तते । इदं च सूत्रं तत्रैवार्थोपस्थितेस्तत्रैवानियमप्रसक्तेश्च ननु वर्णग्रहणे इत्याकरे स्पष्टम् । घुसंज्ञाविधानस्य 'ईहल्यघो' रित्यादौ चारितार्थ्येन उपसर्गे घोः किरित्यादौघु शब्देन-स्वरूपग्रहणापत्तिवारणाय सूत्रेऽशब्दसंज्ञेति । तत्र षष्ठीतत्पुरुषस्तु न स्वीकर्त्तुं शक्यः । कर्मसंज्ञादेश्चार्थसंज्ञात्वेन निषेधाप्रवृत्तौ, कर्मणीत्यादौ स्वरूपग्रहणापत्तेः । तस्मात् सप्तमी तत्पुरुषं स्वीकृत्य शब्दशास्त्रे या संज्ञा तां विनेत्यर्थोमन्तव्यः । भाष्ये तु सूत्रमिदं प्रत्याख्यातम् । तथाहि राज्ञोयदित्यादौ राजरूपार्थेकार्यबाधेऽपि तज्जन्यबोधे प्रकारतया भासमानस्य राजन्शब्दस्यैव ग्रहणंभविष्यति, न नृपादेरनु-पस्थितत्वादितिसूत्रमिदं व्यर्थम् । उपस्थितार्थत्यागे प्रमाणाभावेनार्थस्य विशेषण-तयान्वयसम्भवेन चार्थवद्ग्रहणपरिभाषाऽपि सिद्धा । नचैवमुपसर्गेघोरित्यादौ स्वरूपग्रहणापत्तिरिति वाच्यम् । लक्ष्यानुसारात् तत्तत्संज्ञाकरणज्ञानरूपप्रकर-णात् षान्तसंख्यावाचकषष्शब्दस्य षट्संज्ञाविधानाच्च शब्दसंज्ञायां स्वरूपग्रहणं न भवतीतिज्ञापनात् । अतएव जनपदापत्यपशुदेवतादिशब्देषु न स्वरूपग्रहणम् । पक्षिमत्स्यमृगान्हन्तीत्यादौ मृगपक्षिणोः पर्यायाणां स्वरूपस्यच ग्रहणं सिद्धयति । सूत्राभावादेव विभाषावृक्षेत्यादिषु विशेषाणां ग्रहणम् । स्वेपुषः इत्यत्र पर्यायाणां विशेषाणां स्वरूपस्य च ग्रहणम् । परेश्चघाङ्कयोरित्यत्र घशब्देन स्वरूपग्रहणम् । नदी पौर्णमासीत्यत्रनदीपदेन च स्वरूपग्रहणं सिद्धयति लक्ष्यानुसारात् । न च शब्द संज्ञायां स्वरूपग्रहणं न भवतीति ज्ञापनात् कथं पूर्वोक्तसूत्रद्वये स्वरूपग्रहणमिति वाच्यम् । ज्ञापकसिद्धस्यासार्वत्रिकत्वेनादोषादिति दिक् ।

१४—सुप्तिङन्तं पदम् ।

ननु प्रत्ययग्रहणपरिभाषया लब्धतदादिशब्दरूपं विशेष्यमादाय "येनविधि-" रिति सूत्रेण तदन्तग्रहणं सिद्धमिति सूत्रेऽन्तग्रहणं 'संज्ञाविधौप्रत्ययग्रहणे तदन्त ग्रहणन्ने"ति परिभाषा ज्ञापनार्थम् । तेन "तरप् तमपौ घः" इत्यनेन तरप्तमपोरेव घसंज्ञाविधानात् "कुमारीब्राह्मणितरा" इत्यत्र कुमारी शब्दस्य न ह्रस्वत्वम् । एतन्निषेधसामर्थ्यादेव घरूपेत्यादिप्रदेशेष्वपि न तदन्तविधिः । यत्तु प्रत्ययेन स्वप्रकृत्यवयवकसमुदायस्याक्षेपात् तादृशसमुदायं विशेष्यमादाय तदन्तविधिसिद्धौ सूत्रेऽन्तग्रहणं संज्ञाविधावितज्ञापनार्थमित्युक्तम्, तन्न समीचीनम् , "इया"नित्यादौ

तस्य तादृशसमुदायस्य व्यभिचारेण आद्येगासम्भवात् । आद्वितस्य शाब्देऽन्वयाऽभावाच्च । ननु परिभाषाज्ञापनोत्तरमप्यन्तग्रहणं व्यर्थमेव । न चान्तग्रहणाभावे सुतिङोरेव पदसंज्ञाविधानात् "पचती"त्यादौ पदस्येत्यनेन तिशब्दस्य द्वित्वापत्तिरिति वाच्यम् । पदपदस्य प्रत्ययमात्रवृत्तिविषयताप्रयोजकत्वेन प्रत्ययग्रहणपरिभाषया पदान्ततदादेर्द्वित्वमित्यर्थेनादोषादिति चेन्न । पदत्वस्य प्रकृतिप्रत्ययसाधारणतया प्रत्ययमात्रबोधकत्वाभावात् । "इयान्" इत्यादौ यस्मात्प्रत्ययविधिस्तदादि तद्धितान्तत्वं व्यपदेशिवद्भावेन । "हलिसर्वेषा"मित्यादि निर्देशात् सहाये व्यपदेशिवद्भावाप्रवृत्त्या हरिष्वित्यादौ न दोषः । अत एव "ढौकते" इत्यादौ —औकारस्यैजन्तोपदेशत्वं व्यपदेशिवद्भावेनाशंक्यार्थवता व्यपदेशिवद्भाव इत्युक्तं भाष्ये । वर्णस्यार्थवत्वमसहाये एवेतिदिक् ।

१५—हलोऽनन्तराः संयोगः ।

ननु "प्रत्येकं वाक्यपरिसमाप्ति" रितिन्यायात् प्रत्येकं संयोगसंज्ञा कुतो नेति चेन्न "गर्गाःशतं दण्ड्यन्ता"मित्यत्र समुदाये शतदण्डनवदत्रापि समुदायस्यैव संज्ञाविधानात् , अनन्तरापदस्वारस्याच्च । संयुज्यन्ते वर्णा यत्रेत्यन्वर्थसंज्ञाबलान्न प्रत्येकं संज्ञेतिसमाधानं न युक्तम् । "घटपटौ संयुज्येते यत्रे" त्यादौ संयुज्यमानपदार्थव्यतिरिक्तस्यैव अन्यपदार्थतयाप्रतीतेर्व्युत्पन्नत्वेन तदतिरिक्तद्घटितपदवाक्यरूपसमुदायस्य संज्ञापत्तेः । अतएव सुदृषद् भातीत्यत्र प्रत्येकं संयोगसंज्ञाऽभावात् संयोगान्तलोपो न । नन्वेवमपि "हल" इतिबहुवचनानुरोधाद् बहूनामेवस्यान्न द्वयो रिति चेन्न, सौत्रं बहुवचनमिति ग्रंथकाराशयात् । यद्वा हलौ च हलश्चेत्येकशेषस्तेन द्वयोर्बहूनां संयोगसंज्ञा सिद्धयति । यत्र बहवो हलः संश्लिष्टास्तत्रापि द्वयोरेव संज्ञा । स्कोः झलिपरे संयोगादिलोपविधानात् । बहूनां संज्ञाविधाने फलाभावाच्च । आनन्तर्यं व्यवधानाभावः । व्यवधानञ्च विजातीयैरेवेत्यभिप्रेत्याह— अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः । इति संज्ञाप्रकरणम् ।

अथ परिभाषाप्रकरणम् ।

१६—इकोगुणवृद्धी ।

नापि तच्छेषो नापि तदपवादोऽन्यदेवेदं परिभाषान्तरमसम्बद्धमनया परिभाषयेतिभाष्यात् परिभाषासूत्रमिदम् । नच त्यदादीनाम इत्यादावस्योपस्थितिदुर्वारेति

वाच्यम्। गुणवृद्धिग्रहणमनुवृत्त्यैव सिद्धे सूत्रे गुणवृद्धिग्रहणसामर्थ्यात् अदेङ्निष्ठविधेयताप्रयोजकं गुणपदं यत्र, एवमादैच्निष्ठविधेयताप्रयोजकं वृद्धिपदं यत्र तत्रेक इति षष्ठ्यन्तं पदमुपतिष्ठते इत्यर्थस्वीकारेणादोषात्। नच पूर्वसूत्रद्वये गुणवृद्धिपदस्य संज्ञापरत्वात् कथमत्र संज्ञिपरत्वमिति वाच्यम्, संज्ञा करणेनान्यत्र संज्ञिपरत्वदर्शनात्। अथवा गुणवृद्धिग्रहणमनुवर्त्य गुणोयोगुणः वृद्धिर्या वृद्धिरितियोजनयैतल्लाभः। स्वादि ष्विति सूत्रेऽनुवृत्तपदस्य संज्ञापरत्वदर्शनात्। "ष्णान्ता षडिति" सूत्रे संख्यापदस्य षान्तत्वनान्तत्वासम्भवात् संज्ञिपरत्वम्। नच लक्षणप्रतिपदोक्तपरिभाषयैव "त्यदादीनाम" इत्यादाविक्पदोपस्थितिवारणसम्भवाद् गुणोयोगुण इत्यर्थकल्पनं न युक्तमिति वाच्यम्, तत्तच्छब्दानुवादेन विहितस्य साक्षादुच्चरितस्य वा प्रतिपदोक्तस्याभावेन परिभाषाया अप्रवृत्तेः। विधेयसमर्थकगुणवृद्धिपदश्रुति र्यत्र तत्रास्य प्रवृत्तिस्वीकारादेव विधौ परिभाषोपतिष्ठते नानुवादे इत्युद्घोषः। एवञ्च पदोपस्थापकपरिभाषा विषये विधीयते इत्यस्यैवाध्याहारो बोध्यः। अतएव तस्मिन्निति निर्दिष्टे "षष्ठी स्थाने" इत्यादेरनुवादेऽपिप्रवृत्तः। तत्रविधिवाक्ये प्रथमाया विधेयविभक्तित्वेन तदन्तस्य विधेयसमर्पकत्वाद् गुणादिपदानामिक्पदोपस्थापनेन चरितार्थानामपि वाक्यार्थान्वयिता। "एधिते" त्यादौ व्यञ्जनानां गुणव्य वृत्त्यर्थं भिन्नमित्यादौ क्ङितिचेति निषेधप्रवृत्तये इग्लक्षणत्वसम्पत्त्यर्थं चेदं सूत्रमिति दिक्।

१७—षष्ठीथाने योगाः।

"दर्भाणां स्थाने शरैः प्रस्तरितव्य" मित्यत्र यथा स्थानशब्दस्यप्रसंगार्थकत्वमेवमिहापि स्थानशब्दःप्रसंगवाची। प्रसंगश्च सतिसम्भवे अर्थवत एव भवति। अर्थप्रत्यायनार्थं शब्दप्रयोगात्। तथाचेकोयणचीत्यादेरच्परकेकारघटितशब्दस्यार्थबोधनायोच्चारणप्रसंगे तत्परकयकारघटितमुच्चारणीयमितिसूत्रार्थः। शब्दानित्यत्ववारणाय एरुरित्यादेश्च तेस्तुरित्यर्थः स्वीकर्त्तव्यः। नचैवं षष्ठीनिर्दिष्टत्वस्य विधेयत्वस्य चानर्थक्यापत्तिरिति वाच्यम्। इकारबुद्धिप्रसंगे यकारबुद्धिरित्यर्थकरणेनादोषात्। अत एव—अचः परस्मिन्नित्यादि संगच्छते। स्थानपदार्थश्च वृत्ति विशेष्यतावच्छेदकतावच्छेदकताकेष्टसाधनत्व प्रकारक भ्रमविषयत्वप्रकारकज्ञानीयविशेष्यतावच्छेदकावच्छिन्नविशेष्यताकेष्टसाधनत्वप्रकारकप्रमाविषयत्वप्रकारकज्ञानीय विशेष्यतावच्छेदकतावच्छेदकता।

१८—तस्मिन्निति निर्दिष्टेपूर्वस्य।

अत्रसूत्रे तस्मिन्निति, उत्तर सूत्रे तस्मादिति च सप्तम्यन्तपञ्चम्यन्तपदार्थकस्य स्वतंत्रस्यसर्वनाम्नो निर्देशो व्याख्यानात्, बहुलक्ष्यसंस्कारानुरोधाच्च। तत्तत् पदपरत्वे हि "तस्मिन्नणिच", "तस्मान्नुडची" त्यादावनयोः प्रवृत्तावपीकोयणचि, "द्व्यन्तरुपसर्गेभ्योऽप ईदित्यादौ प्रवृत्तिर्न स्यात्। न चैवं सप्तमीनिर्देशो व्यर्थः, साधुत्वार्थं सोरेवौचित्यादिति वाच्यम्। सप्तम्यन्तानामेव तच्छब्दार्थत्वमिति बोधनाय, तद्बोध्यार्थस्य "निर्दिष्टे" इत्यनेन सामानाधिकरण्याय च तस्यावश्यकत्वात्। इतिशब्दः पुनस्तस्य तदर्थपरत्वं बोधयति। निःशब्दो नैरन्तर्ये, दिशिरुच्चारणे, तथा च सप्तम्यन्तार्थेऽव्यवहितोच्चारिते उपश्लिष्टस्य पूर्वस्य कार्यमिति सूत्रार्थः। एतत् सूत्रद्वयोपस्थितसप्तम्यन्तपदस्य पञ्चम्यन्तपदस्यचार्थो लिङ्गम्। अत्र सूत्रे उपश्लिष्ट पदाध्याहारेण निर्दिष्टे इत्यौपश्लेषिकाधिकरणबोधिका सप्तमी। उपपदविभक्तेरिति न्यायात्। अत एव "तस्मिन्निति" परिभाषायां सत्यां सत् सप्तम्याश्रयणमशक्यमिति कैयटोक्तिः संगच्छते। एवञ्चाजुपश्लिष्टस्येकोयणित्यर्थे पूर्वस्येव परस्याव्यवहितस्येवव्यवहितस्य च यणादिकार्यप्राप्तौ पूर्वस्यैवाव्यवहितस्यैवेति च नियमार्थमिदम्। अतएव "कर्तृकर्मणोःकृति"रित्यादौ नास्य सूत्रस्य प्रवृत्तिः, औपश्लेषिकसप्तम्यभावात्। "तस्मादित्युत्तरस्ये"ति सूत्रे "निर्दिष्टे" इत्यस्य विभक्तिविपरिणामेण निर्दिष्टा दित्यर्थः। उत्तरस्येति दिग्योग पञ्चमी। एवञ्च दिग्योगलक्षणपञ्चम्यामेव तस्मादित्युत्तरस्येतिप्रवृत्तिः। उदःस्थेत्यादावनियतदिक्शब्दाध्याहारे प्रसक्ते परशब्दस्यैवाध्याहार इति तु नियम्यते। अर्द्धमात्राधिककालेन वर्णान्तरेण वा व्यवधानेउपश्लेषाभावस्वीकारे निर्दिष्टपदं संहिताधिकारश्च विफल एव। अवग्रहे सम्प्रदाय एव शरणमित्यानङादिविषये आदेशोत्तरमेवावग्रहोऽन्यत्र ततः प्राक्—न चाकृतव्यूहपरिभाषया तन्न स्यादिति वाच्यम्, तस्या अनित्यत्वादसत्त्वाच्च न—लक्षणेन पदकारा अनुवर्त्त्याः पदकारैर्नाम लक्षणमनुवर्त्यमिति भाष्येण तदनुरोधेन शास्त्रासंकोचस्य शास्त्रकरणाभावस्य च स्पष्टमुक्तत्वाच्च। एवञ्च संहिताधिकारस्तद्वहिर्भूतानामर्द्धमात्राधिककालव्यवाये प्रवृत्तिज्ञापनार्थम्, तेनाग्नाविष्णूइत्यादाववग्रहे आनङादिसिद्धिरिति दण्ड्याद्युक्तिः परास्ता। नच सप्तम्यन्तार्थेऽव्यवहितोच्चारिते उपश्लिष्टस्य पूर्वस्य कार्यमिति-वाक्यार्थबोधस्वीकारेऽव्यवहितोच्चरितसप्तम्यन्तार्थोपश्लिष्टमुद्दिश्य पूर्वत्वविधाना-

सम्भवस्तस्य केनाप्यसिद्धत्वादिति वाच्यम् , सप्तम्यन्तार्थे उपश्लिष्टस्यकार्यमव्यवहितोच्चारिते पूर्वस्य बोध्यमित्येवमुद्देश्यविधेयभावकल्पनेनादोषादितिदिक् । इति परिभाषाप्रकरणम् ।

अत्र स्वरसन्धिः ।

१६—अनल्विधौ ।

नव्यमते स्थानिभूतो योऽल् तद्वृत्ति र्यो धर्मस्तन्निमित्तके विधौ न स्थानिवत् । अतएव धिन्वन्तीत्यत्रेडभावः सिद्धयति । उकारवृत्त्यार्धधातुकत्वस्य वकारेऽनतिदेशात् । किञ्च भोभगो इति सूत्रेऽशूग्रहणाभावे रेफवृत्तिरुत्वं विसर्गेऽदितिश्यत्वापत्तिवारणाय सूत्रेऽशूग्रहणं व्यर्थम् । अनल्विधाविति निषेधेन विसर्गे रुत्वानयनासम्भवादितिभाष्येऽप्युक्तम् । नचैवं "ऋ"धातोर्द्वित्वेऽभ्यासस्येरदत्वे हलादिशेषो न स्यात् । अनल्विधाविति निषेधेनाऽर् शब्देऽभ्यासत्वानयनासम्भवादिति वाच्यम् । द्विर्वचनीयविधेयताश्रयद्विर्वचनीयोद्देश्यताश्रयैतदुभयमात्रारब्धसमुदायघटकोयो द्विर्वचनीयविधेयताश्रयावधिकपूर्वत्वविशिष्टः सोऽभ्याससंज्ञकोभवतीति पूर्वोऽभ्यास इत्यस्यार्थस्वीकारेणादोषात् । नचैवं रामायेत्यादावेकारवृत्तिसुप्त्वस्ययकारेऽनतिदेशाद्दीर्घो न स्यादिति वाच्यम् । अल्त्वव्याप्यधर्मावच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिकारोपप्रकारीभूतधर्मनिमित्तके न स्थानिवदित्यर्थस्वीकारेणादोषात् । नचैवंहल्ङ्याबितिसूत्रभाष्यविरोधः, अतिरवट्वो, निष्कौशाम्बिरित्यादावाप्त्वङीप्त्वयोः स्थानिवद्भावेन ह्रस्वाकारे इकारे चातिदेशासम्भवात् सुलोपव्यावृत्तिसिद्धौ तदर्थं दीर्घग्रहणस्य ङ्याब्ग्रहणेऽदीर्घ इतिवार्तिकस्य ङी, ई, आ, आबिति प्रश्लेषस्य चवैयर्थ्यापत्तिरितिवाच्यम् । अल्त्वव्याप्यधर्मावच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिकारोपप्रकारीभूतधर्मेण साक्षादवच्छिन्ना या—उद्देश्यता तदुद्देश्यताके कार्ये कर्त्तव्ये न स्थानिवदित्यर्थस्वीकारेणादोषात् । नचैवमपि दाम्नीत्यादौ द्विर्वचनत्वातिदेशाभावात् प्रगृह्यसंज्ञा न स्यादिति वाच्यम् , अल्त्वव्याप्यधर्मेण साक्षादवच्छिन्ना या स्थानिता तादृशस्थानितानिरूपितादेशताश्रयधर्मिकारोपप्रकारीभूतधर्मेण साक्षादवच्छिन्ना या उद्देश्यता तदुद्देश्यताके विधौ न स्थानिवदित्यर्थं स्वीकृत्य "नपुंसकाच्च" इत्यस्यौङभिन्नस्य क्लीवात् परस्येत्यर्थस्वीकारेणादोषादिति दिक् ।

प्राचीनमते।

स्थानिसम्बन्ध्यल्वृत्तिधर्मनिमित्तके कार्ये स्थानिवत्त्वं नेत्यर्थः। नचैवं रामायेत्यादौ स्थानिवद्भावप्रतिषेधाद्दीर्घानापत्तिरितिवाच्यम्, स्थानिसम्बन्ध्यलत्व-व्याप्यधर्मनिमित्तकेकार्ये स्थानिवत्त्वं नेत्यर्थेनादोषात्। नचैवं प्रपठ्येत्यादौ-वलादित्वस्यातिदेशादिडागमापत्तिरिति वाच्यम्, स्थानिसम्बन्धि योऽल् तद् वृत्ति-र्योऽल्त्वव्याप्योधर्मस्तद्घटितधर्मनिमित्तके कार्ये स्थानित्वं नेत्यर्थेनादोषात्। नन्वे-वमपि बभूविवेत्यत्रेडनापत्तिरिति वाच्यम्। स्थानिसम्बन्धि योऽल् तद्वृत्ति र्योऽल्त्वव्याप्यो धर्मस्तद्घटितातिदिदिक्षितधर्मनिमित्तके कार्ये न स्थानिवदित्य र्थस्वीकारेणादोषात्। एतन्मते धिन्वन्तीत्यात्रादोषसत्त्वान्नवीनमतमेवयुक्तम्।

२०—प्राधान्यात्कार्यातिदेशोऽयम्।

प्राधान्यात्कार्यातिदेशोऽयम्। शास्त्रातिदेशस्तु कार्यातिदेशादभिन्नरूपः। त-स्यापि कार्यफलकत्वात्। तदुक्तंभाष्ये तत्राङ्गशास्त्रातिदेशात् सिद्धम्। आङ्गंयत्-कार्यंतदतिदिश्यते। एवञ्चानपेक्षितमर्थस्यसन्निधानंयस्मिन्तत्तन्निमित्तरूपकार्यव्यव-हार एवानेन क्रियते। कार्यं तु स्वशास्त्रेणैव। अत एव रामायेत्यादौ स्थानिवत्त्वेन सुप्त्वात् सुपिचेतिदीर्घ इतिसङ्गच्छते। परिवीरित्यादौ परत्वाद् दीर्घ इति च सङ्गच्छते। अथवा किञ्चिन्निमित्तवैकल्येऽपि दीर्घादिकार्यं स्थानिवत् सूत्रेण क्रियते। नचैवं स्थानिवत्त्वेन सुप्त्वात् सुपिचेतिदीर्घ इतिग्रन्थासंगतिरिति वाच्यम् स्थानिवत्त्वेन सुप्त्वमनपेक्ष्य सुपिचेति शास्त्रविहितदीर्घ इतिग्रन्था-शयात्। कार्यज्ञानाय विधिशास्त्रपर्यालोचनस्यावश्यकत्वेन तद्देशेनैव परशास्त्र विहितत्वरूपं परत्वमादाय परिवीरित्यादौ न दोषः। एतत्तात्पर्येणैवातिदिश्यमान कार्याणामुपदेशदेशएव देश इत्युक्तिः। वस्तुतस्तु निमित्तातिदेशपक्षएव श्रेयान्। अतएव स्थान्यल्विधिप्रतिषेधे कुरुत्वधिनां प्रतिषेधो वक्तव्य इत्येतदुपादना वसरे स्थानिवद्भावादङ्गसंज्ञा स्वाश्रयं च लघूपधत्वादि। तत्र लघूपधगुणादिः प्राप्नोतीति भाष्योक्तं सङ्गच्छते। नचैवं प्राधान्यात् कार्यातिदेशोऽयमितिग्रन्थासंग-तिरिति वाच्यम्, कार्यातिदेशोद्विविधः, गौणो मुख्यश्च, पूर्वोक्तग्रन्थस्य गौणाभि-प्रायकत्वादति दिक्।

२१—यन्निमित्तवैकल्य।

यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तातिरिक्तसर्वनिनित्तकत्वमतिदेश-

स्यापि । यथा णिचि, यचिभमितिशास्त्रस्य स्वादित्ववैकल्यप्रयुक्तप्राप्ति र्न भवति तदतिरिक्तयादित्वाजादित्वोभयनिमित्तमिष्ठवद्भावेनातिदिष्टभत्वस्यापि वर्णाश्रयत्वमिति व्यवहारः । यन्निमित्तवैकल्यप्रयुक्तोऽदेशाप्रवृत्तिस्तन्निमित्तं शास्त्रीयमेव । नचैवं पड्भ्यामित्यादौ णिलोपे स्वादित्वाजादित्वोभयाभावप्रयुक्ता यचिभमित्युपदेशाप्रवृत्तिरितितदतिरिक्तनिमित्तकत्वेनेष्ठवद्भावे वर्णाश्रयत्वाभावाद् भसंज्ञा स्यादवेति कथं जश्त्वमितिवाच्यम्? यन्निमित्तवैकल्य इत्यत्र निमित्तपदेन सादृश्य प्रतियोगितावच्छेदकधर्म, व्यापकधर्मस्य ग्रहणेनादोषात् ।

२२—पचतु ।

स्थानिवदित्युक्त्यैवादेशलाभे सूत्रे आदेशग्रहणं श्रौतस्थान्यादेशभावस्यैव ग्रहणमिति शंकावारणद्वारा ऽऽनुमानिकादेशस्यापि संग्रहार्थम् । तेन 'पचतु, इत्यादेः पदत्वसिद्धिः । ननु छिन्ने पुच्छे शुनि श्वत्वव्यवहारवदेकदेशविकृत न्यायेनैव तोस्तिङ्त्वमपि सिद्धम् । तदुक्तं भाष्ये दीव्यतिशब्दैकदेश-दीव्यच्छब्दानुकरणमिदमित्युक्त्वा किमर्थं विकृतनिर्देशः एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषा—एकदेशविकृतमनन्यवत् । अतएव आयस्शब्दादणन्ताद् द्विवचने आयसावित्यत्र वृद्धौ कृतायां सान्तस्योगित्वेनानेन न्यायेन प्राप्तो नुमचः परस्मिन्निति स्थानिवत्वेन वारितोभाष्ये । अन्तादिवच्चेतिसूत्रेऽपि गुडोदकमित्यत्र गुणे कृते दकशब्दस्यानेन न्यायेन उदकशब्दत्वमाश्रित्योदकेऽकेवले इति पूर्व पदान्तोदात्तत्वमुक्तम् । नन्वेवमपि शब्दानित्यत्वापत्तिरिति वाच्यम्, रेखागवयादिनिष्ठ लाङ्गूलवत्त्वाभावात् । तथाच लोकन्यायेनैव पदत्वसिद्धौ नात्रानुमानिक स्थानिवद्भावस्योपयोग इति चेन्न, अर्द्धस्यान्यत्वे जाति व्यञ्जकभूयोऽवयवदर्शनाभावेन न्यायेन तौतित्वप्रतीतेरसम्भवात् । किञ्च तिबादिसूत्रोपात्तपरिछिन्नपरिमाणस्य तिङ्संज्ञाविधानात् परिछिन्नपरिमाणार्थवाचकशब्दानां शास्त्रव्यापारं विना न्यूनेऽधिकेवाऽप्रवृत्तेः । नच पचत्वित्यत्र न्यूनाधिकत्वाभावात् कथं न्यायप्रवृत्तिरिति वाच्यम् । तस्य वैरूप्योपलक्षणत्वादितिदिक् ।

२३—तण्डुलान् ।

ननु तण्डुलानित्यादौ स्थानिवद्भावेन प्रत्ययान्तत्वेपि स्वतः प्रत्ययान्तभिन्नत्वात् प्रातिपदिकसंज्ञा दुर्वारेति चेन्न ! अतिदेशस्वभावेनातिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्याभावात् । अतएव जहीत्यादौ जादेशस्यासिद्धत्वात् स्वाश्रयहेर्लुङ् न । अ-

सिद्धवत् सूत्रस्य तु न वैयर्थ्यम्। शाधीत्यादौ स्थानिप्रयुक्तधिभावसम्पादनेन चारितार्थ्यात्। नन्वेवमप्यप्रत्ययेत्यस्य पर्युदासत्त्वे शास्त्रीयकार्याभावात् कथं स्थानिवद्भावेन प्रत्ययान्तत्वमिति वाच्यम्। वेःस्कन्देरनिष्ठायामिति सूत्रेऽनिष्ठायामिति पर्युदासेन वृत्त्यादिसम्मतेन पर्युदासलभ्याऽशास्त्रीयेऽपि शास्त्रतात्पर्यविषये शास्त्रीयवदतिदेश बोधनात्। 'विस्कन्नः' इत्यादौ षत्वाभावाय स्थानिवत्वेनैव निष्ठात्वस्य वक्तव्यत्वात्। प्रसज्यप्रतिषेधाश्रयणे तु लक्ष्यानुसारिव्याख्यानादेव षत्वाभावसिद्धिः। केचित्तु—तत्स्थानापन्नस्तद्धर्मं लभते इति लोकन्यायेनैव तद्धर्मलाभस्य तत्कार्यस्य च सिद्धेरयमतिदेशः स्वंरूपमित्येतच्छास्त्रसत्त्वात् "हन्तेः कार्यं वधौ न स्यात्" तदर्थं स्थानिवत्सूत्रम्। तथा च स्वंरूपमिति शास्त्राविषये "विस्कन्नः' इत्यादौ लोकन्यायेनैवसिद्धिः। अनेन न्यायेनाशास्त्रीयस्यापि धर्मस्यातिदेशो भवति। लोक न्यायाश्रयणेऽतिप्रसङ्गवारणन्तु लक्ष्यानुरोधात् क्वचिल्लोकन्यायानाश्रयणेनैव "न पदान्ते"ति सूत्रे ब्राह्मणकण्डूतिरित्युदाहरणात्। अतएवार्थवत् सूत्रशेषे अप्रत्ययस्येत्यस्य पर्युदासकत्वमेवोक्तम् भाष्ये, तत्रहि 'काण्डे' इत्यत्र पूर्वान्तवद्भावेन प्रत्ययान्तभिन्नत्वाद्दोषः शङ्कितो नतु स्वाश्रयाप्रत्ययान्तत्वेनेतिदिक्।

२४—अचः परस्मिन् पूर्वविधौ।

अनेन सूत्रेणाज्मात्रस्थानिकादेशस्य स्थानिवद्भावविधानान्मरुतमाचष्टे मारयतीत्यत्राज्झलादेशस्य स्थानिवद्भावाभावाद्वृद्धिः सिद्ध्यति। प्रमाणञ्चात्र "नसम्प्रसारणेसम्प्रसारणम्" इति सूत्रमेव। प्रयोगे योऽच् तत्स्थानिकादेशस्य स्थानिवद्भावविधानात् णिलोपादेः स्थानिवत्वं सिद्ध्यति। स्थानिनि सति यद्भवति तदादेशेऽपि भवति, स्थानिनि सति यन्न भवति तदादेशेऽपि न भवतीति भावाभावयोरुभयोरनेनातिदेशः। स्थानिवत् सूत्रात् स्थानिवदिति शब्दाधिकारात्। न च देवयतेः क्विपि (दयूः) इत्यादौ स्थानिनि णिचि सति वकारे परतोऽभवतोऽयादेशस्य लोपादेशेऽप्यभावापत्तिरिति वाच्यम्, स्थानी न निवृत्तः, आदेशो नजात इतिसम्भावनायां यद्भवति तद्भवति यन्न भवति तन्न भवतीत्यर्थस्वीकारेणादोषात्। विधि-शब्दे तन्त्रम्। तेनैकस्य कर्मसाधनस्य पूर्वसम्बन्धिन्येव शास्त्र-विधेये कर्त्तव्ये स्थानिवद्भाव इत्यर्थात् 'आरतुः' इत्यादौ ऋच्छत्यृतामिति गुणस्य सवर्णदीर्घेकर्त्तव्ये न स्थानिवत्वम्। अपरत्र भावसाधनस्य विधि-शब्दस्यषष्ठ्यन्तपूर्वशब्देन समासः। पूर्व-सम्बन्धिनि भावे तत्स्थिता

स्थानिवदित्यर्थः। अतएव 'ऐनेय' इत्यादौ यस्येति चेति लोपस्य स्थानिवत्वात् सन्नियोगशिष्टन्यायाप्रवृत्तौ नकार-स्थितिः। अतएव पञ्चेन्द्राण्यो देवताऽस्य पञ्चेन्द्र इति लुकि न स्थानिवदित्यस्योदाहरणं भाष्ये प्रदत्तम्। अन्यथा तत्र पूर्वत्वेन दृष्टस्य सम्बन्धिनः कस्यचिद्विधेयस्याभावात् निषेधासंगतिरिति दिक्।

८५—नपदान्तेति।

नन्वत्रसूत्रे वरेयलोपस्वरदीर्घभिन्नानां द्विर्वचनादीनां ग्रहणं व्यर्थम्। एषांत्रिपादीस्थत्वेन तत्र कार्ये स्थानित्वस्यैवाप्रसक्तेरिति चेन्न! वतिघटितातिदेशानां त्रिपाद्यामपि प्रवृत्तिर्भवतीति ज्ञापनेन तस्य चारितार्थ्यात्। तथाच द्विर्वचनादिग्रहणं पूर्वत्रासिद्धे न स्थानिवदित्येतस्यैकदेशानुवादः। अतएव "रामः" इत्यादौ स्थानिवद्भावेन पदत्वाद्विसर्गसिद्धिः। अत्रसूत्रे विधिशब्दो विधानं विधिरिति भाव-साधनः। अन्त शब्दश्चरमावयववाची, कर्म-षष्ठ्या समासः। तथाच पदचरमावयवे विधौ न स्थानिवदित्यर्थः सम्पद्यते, तेन "एषोयन्हसती" त्यादावुत्वेकर्त्तव्ये यणः स्थानिवत्वात् सुलोपो न। स्थानिवद्भाव-निषेधस्य तु नप्राप्तिः। विधेयस्य लोपस्याभावरूपत्वेन पदचरमावयवत्वाभावात्। नचैवं 'वेतस्वानि'त्यत्र टिलोपस्य स्थानिवद्भावनिषेधात् रुत्वापत्तिरिति वाच्यम्; पदेऽन्त इति सप्तमीसमासमाश्रित्य पदेपरतश्चरमावयवे कार्ये कर्त्तव्ये परपदस्थाजादेशो न स्थानिवदित्यर्थ-स्वीकारेणादोषात्। नन्वेवमपि पूर्वत्रासिद्धे न स्थानिवदित्यनेन स्थानिवद्भाव-निषेधाद् रुत्वापत्तिस्तदवस्थेति चेन्न, पदेऽन्त इतिसप्तमीसमासमाश्रित्य तत्र स्थानिवत्व-निषेध-व्यावृत्तिपरभाष्यप्रामाण्येन पूर्वत्रासिद्धे इत्यत्र पदचरमावयव-विधायकातिरिक्तस्यैव त्रैपादिकस्यग्रहणेनादोषात्। अतएव महिष्मानित्यत्र जश्त्वाभाव-सिद्धिः। नचैवं जश्विधौ स्थानिवत्त्वनिषेधो दुर्वार इति वाच्यम्, चर्साहचर्यात् झलां जश् झशीत्यस्यैव तत्र ग्रहणात्। नचैवमपि जश्त्वे कर्त्तव्ये बहिरङ्गस्य टिलोपस्यासिद्धत्वाज्जश्त्वं न भविष्यतीति वाच्यम्, त्रिपाद्यां कार्यकालपक्षेऽपि बहिरङ्गपरिभाषाया अप्रवृत्तेः। नचैवमपि "गोचा" इत्यादौ गतिकारकोपपदानामित्यनेन सुबुत्पत्तेः पूर्वं समासे पदत्वाभावान् "नपदान्त" इतिनिषेधाप्रवृत्तावल्लोपस्य स्थानिवत्वादवङादेशापत्तिरिति वाच्यम्। "गतिकारकोपपदाना"मित्यस्यानित्यत्वेन सुबुत्पत्त्यन्तरं समासे कृते प्रत्ययलक्षणेन पदत्वान् "नपदान्त"इतिनिषेध-प्रवृत्तेः सुलभत्वात्। "उत्तर-पदत्वेचापदादिविधा" वितिप्रत्ययलक्षणप्रतिषेधस्य तु न प्राप्तिः। उत्तर-

पदस्य कार्यित्वाभावात् । 'पदे' इत्यस्य पदत्वयोग्योपलक्षणत्वाद्वेति दिक् ।

२६—चतुर्विधस्थानिवद्भावः ।

चतुर्विधः स्थानिवद्भावः, यथा—प्रथमः साक्षात्पदचरमावयवसाधकः । द्वितीयः परम्परया पदचरमावयव-साधकः, तृतीयः साक्षात्पदचरमावयवप्रतिबन्धकः, परम्परया पदचरमावयव-प्रतिबन्धकश्चेति । तत्र परम्परया पदचरमावयवसाधक-स्थानिवद्भावं वर्जयित्वा त्रिविध-स्थानिवद्भावस्यानेन निषेधः । भाष्ये तु पूर्वत्रासिद्धे न स्थानिवदिति स्वीकृत्य वरे यलोप स्वरदीर्घ-ग्रहणवर्जं द्विर्वचनादि-ग्रहणं प्रत्याख्यातमिति दिक् ।

२७—गव्यूतिः ।

ननु गव्यूतीत्यत्र हलिसर्वेषामित्यनेन, लोपः शाकल्यस्येत्यनेन वा वलोपाप-त्तिरिति चेन्न, सूत्रे वकार-प्रश्लेषेण श्रूयमाणवकारान्तादेश-विधानात् । नचैवं विशेष-विहितेन वस्यनिमित्तत्व-बाधात् कथं "लोपोव्यो" रित्यनेन सूत्रे वलोप इति वाच्यम् । निमित्तानाक्रान्ते विषये "जीरदानु"रित्यादौ कार्यित्वस्य चारितार्थ्यात् । तक्रकौण्डिन्यन्यायोऽप्यनवकाशविषये विधेय-विषये च प्रवर्तते । तथाहि "नित्यं कौटिल्येगता" विति सूत्रे विग्रहेण विशेषासम्प्रत्ययान्नित्य-ग्रहणमनर्थकम् । क्रिया-समभिव्याहारे च नैतेभ्यो यङा भवितव्यम् । 'चेन'—विशेषासम्प्रत्ययादित्य-नुकर्षकचकार-वैयर्थ्यापत्तिः, तक्र-कौण्डिन्यन्यायेनैव बाध-सिद्धेः । तस्य च वार्त्ति-केऽनुवृत्त्या—'गव्यूति' रित्यत्र वलोपो न । वस्तुतस्तु—सूत्रे प्रश्लेषस्य न फलं 'गव्य'मित्यादौ भत्वेन पदत्वबाधात् । गोशब्दादिभ्यः क्यजादावपि न फलम्, "नः क्ये" इति नियमेन पूर्वस्य पदत्वाभावात् । तथाच वार्तिके एव प्रश्लेष उचित इत्याशयेनाह "छकाराद् वे"ति । नच "लोपोव्यो" रिति सूत्रे वकार-ग्रहणस्य भाष्ये प्रत्याख्यानात् कथ तेन लोप इति वाच्यम् । तस्य लौकिको-दाहरणमात्र-विषयत्वात् । अतएव "इकोगुणवृद्धी"ति सूत्रेऽतोल्लान्तस्येत्यत्र लुप्त-निर्दिष्टो वकार इत्युक्तं भाष्ये । नन्वेवमपि "गव्यूता" वुच्चारणस्य चारितार्थ्यात् "विष्णवे" इत्यादौ 'तस्यलोप' इत्यनेन वलोपापत्तिरिति वाच्यम् । "गवि च युक्ते" इत्यादि-निर्देशैस्तद्वारणात् । परे तु—लोपेन वकारप्रश्लेषो न युक्तः । किञ्च छन्दसिसर्वविधीनां व्यवस्थितत्वाद् 'गव्यूतौ' न वलोपप्रसक्तिः । यथा रघुनाथादिशब्देसंज्ञाभङ्ग-भिया नित्यस्यापि णत्वस्याभावः । एवं "अध्वपरि-

माणे''ऽपि न वलोपः। सर्वनामशब्दे णत्व-सन्देहस्तु तस्यसंज्ञि-विशेषे आधुनिक-विनियोगात् शास्त्रानुसारि-शब्दस्यैव विनियोग उचित इत्यभिप्रायेण।

वस्तुतस्तु--गोनमिच्छति गव्यति गव्यतीति गव्यमित्यत्र ''नः क्ये'' इत्यनेन पदत्वाल्लोपापत्ति-वारणाय सूत्रे प्रश्लेष आवश्यकः। तथा वार्तिकेऽपि। छान्दसत्वादिति समाधानस्य अगतिकगतित्वात्। अन्यथा छान्दसत्वादेव सिद्धे स्वरवैदिकी-प्रक्रिया-प्रणयनस्यासङ्गत्यापत्तिः। 'रघुनाथादिवदि'ति दृष्टान्तमप्ययुक्तम्, णत्वेन यत्र संज्ञायाः प्रतीतिस्तत्र णत्वेऽपि प्रकृते संज्ञापदोपादानाभावादिति दिक्।

२८—लोपः शाकल्यस्य।

वृक्षं वेतीति वृक्षवीः क्विप् तमाचष्टे इतिणयन्ताद् विच् 'वृक्षव् करोती' त्यत्र वलोपवारणाय सूत्रेऽश्-ग्रहणम्। न च विज्निमित्तक ''लोपो व्यो'' रिति लोपापत्तिरिति वाच्यम्। णिलोपटिलोपयोः स्थानित्वेन वल्परत्वाभावात्। ''न पदान्त'' इति स्थानिवद्भावनिषेधस्य तु न प्राप्तिः। प्रातिपदिकाण्णिजुत्पत्त्या पदत्वाभावेन तस्याप्राप्तेः। किञ्च स्थानिवत्त्व-निषेधं विना पदान्तत्वासिद्धयाऽत्र निषेधाप्रवृत्तिः। न च पदसंज्ञायां टिलोपस्यस्थानिवत्त्वाद् वस्य पदान्तत्वाभावेन लोपाप्राप्तौ सूत्रेऽशीतिव्यर्थमिति वाच्यम्,''पूर्वत्रासिद्धीये'' इति निषेधात्। अनेन चतुर्विधस्थानिवद्भावस्य निषेधः, इति प्राचीनमतम्। परेतु न पदान्ता हलोऽणः सन्तीति लण्सूत्रस्थभाष्याद्वृक्षव्करोतीत्यादिप्रयोगाणामनभिधानमेव ''भोभगो'' इति सूत्रेऽश् ग्रहणमनर्थकम्। अन्यत्राभावादिति वार्तिकाच्च। अशोऽन्यत्र तन्निमित्तकार्य-कार्यिणोरभावादिति तदर्थः। नह्यन्यत्र रुरस्तीति तद्व्याख्यान-भाष्ये रुग्रहणमुपलक्षणम्। एतदाशयमबुध्वाऽशग्रहणमुत्तरार्थम्। हलिसर्वेषामिति 'वृक्षव् करोती'त्यत्र माभूत् इत्येकदेशिनोक्तम्, लण् सूत्रस्थभाष्य-विरोधात्। अतएव भाष्ये उत्तरार्थमित्युक्त्वा ''हलिसर्वेषा''मित्यत्रैव प्रयोजन-मुक्तम्। तत्र बकार-निवृत्त्यैव 'वृक्षव् करोती'त्यत्र लोप-वारण-सम्भवान्न तत्राप्यश्ग्रहण-प्रयोजनमिति तद्भाष्यमेकदेश्युक्तिरिति वदन्ति। वस्तुतस्तु--'वृक्षव् करोती'त्यत्र लोप-वारणाय सूत्रेऽश्ग्रहणमावश्यकम्। ''नहि पदान्ताः परेऽणः सन्ती'' त्यस्य पदान्ताः परे हलोऽणो न सन्तीत्यर्थस्वीकारे ''सुद्ध्युपास्ये'' त्यादेरसंगतिः। पदान्ते यकारस्य वर्तमानत्वात्। तस्मात् पदान्ताः परेऽणोऽनुनासिक-प्रवृत्तियोग्या न सन्ति। तेषां हल्त्वेनाच्त्वाभावात् ''अणोऽप्रगृह्यस्ये'' त्यस्या

प्राप्तिः । अतएव अश्ग्रहणमनर्थकम् । 'अन्यत्राभावादि'त्यस्य न ह्यन्यत्यत्र रु रस्तीति भाष्योक्तव्याख्यानं संगच्छते । उपलक्षणत्वे मानाभावः । किञ्च तन्निमित्त कार्यकार्यिणोरित्यर्थेऽपि न मानम् । न च "लोपः शाकल्यस्ये"त्यत्र प्रयोजनम नुक्त्वा "हलिसर्वेषा"मित्यत्र तत्कथनमनुचितमिति वाच्यम्, फलाभावात् । हल्रूपेऽशि विशेष-विहितेन नित्यलोपेनैव बाधाच्चेति दिक् ।

२६— अन्तादिवच्च ।

अत्र सूत्रे 'पूर्वपरयो'रित्यनुवर्तते, यथासंख्यञ्च । अन्तादिशब्दावेकादेश-स्थानिपरौ, पूर्वपरशब्दौ तद्घटित-समुदाय-परौ । तथा च पूर्वस्य परस्य च समुदाय-स्यान्तादिभ्यां वर्णाभ्यां पृथक्स्थिताभ्यां ये व्यवहाराः प्रातिपदिकत्वसुबन्तत्वादयस्ते कृतैकादेशस्यापि भवन्तीति सूत्रार्थः । ह्रस्वत्वादिवर्णमात्रवृत्तिधर्मस्य नानेनाति-देशः । अतएव 'खट्वाभि'रित्यत्रैस् न । 'अयजेइन्द्र'मित्यादौ सवर्ण-दीर्घश्च न । तदुक्तं भाष्ये-वर्णाश्रयेचान्तादिवत्त्व-प्रतिषेधो वक्तव्यो न वा, अतादूरू-प्यातिदेशात् । तेन, 'रामौ' इत्यादावेकदेशविकृतन्यायेन मान्ते प्रकृतित्वं 'औ' इत्यत्र परादिवद्भावेन सुप्त्वं चादाय पदत्वसिद्धिः । स्थानिवत्सूत्रेण गतार्थमिति-मनोरमौक्तिर्नयुक्ता ।

'क्षीरपेणे'त्यादावेकारविशिष्टे एकाजुत्तरपदत्वातिदेशाय "अन्तादिवच्चे"तिसूत्रस्यावश्यकत्वात् । नहि स्थानिवद्भावेनैतल्लाभः । विशेषणतयाऽलाश्रयणात् । किञ्च "भियोहेतु' रित्यत्रैकादेशे, वर्णयोरेव स्थानित्वं नसमुदायस्येति 'भी ई, भिय'इत्यादावेकादेशविशिष्टे धातुत्वातिदेशादियङ्सिद्धिः, धातुत्वस्यैकादेश-स्थानिधर्मत्वाभावेन स्थानिवत्त्वाप्रवृत्तेः । भी, ई, इति बुद्धि-प्रसङ्गे 'भी' इति बुद्धिः कर्त्तव्येत्यानुमानिकस्थानिवद्भावमादायाऽपि न निर्वाहः । 'भी, ई,' इति समुदाये धातुत्वस्याविद्यमानत्वात् । प्रत्येकं स्थानित्व-स्वीकारे तु स्वाश्व-शब्दस्य स्थानित्वेन स्वशब्दतया तत ईरिन् शब्दे वृद्ध्यापत्तेः । किञ्च सूत्राभावे "उभयत आश्रयणे" इत्यस्यासङ्गत्या 'अभीयादि'त्यत्र ह्रस्वापत्तिः । नच "उभयत आश्रयणे न स्थानिवद्" इति वचनान्न दोष इति वाच्यम्, "अचः परस्मिन्नि त्यस्याप्युभयत आश्रयणेऽप्रवृत्त्यापत्तौ (प्लायते) इत्यस्यासिद्धिरिति नवीनमतम् । वस्तुतस्तु —'क्षीरपेणे'त्यादावेकाच्त्वस्य स्वतः सिद्धत्वात् उत्तर-पदत्वस्य 'पे' इत्यत्र स्थानिवद्भावेनाऽऽनयनसम्भवात् सूत्रमिदं विफलम् । अर्थवत्त्वेव

स्थान्यादेश-भावविश्रान्तिरिति सिद्धान्तात् भी, ई भियः इत्यत्र ईकार-प्रश्लेषेऽपि भीरित्यस्य स्थाने भीरित्यादेशः, ई इत्यस्य स्थाने 'ई' इत्यादेशः । 'भी ई' इत्यस्य स्थाने भी, इत्यादेशः, इत्यानुमानिक-स्थानिवद्भावसम्भवात्, भी-वृत्ति-धातुत्वस्य स्थानिवद्भावेन 'भी' इत्यत्रातिदेशादियङ्सिद्धिः । 'स्वाश्व' शब्दे तु न तथा, स्व, इत्यस्य स्थाने 'स्वा', 'अश्व,' इत्यस्यस्थाने 'आश्व, स्व अश्व इत्यस्य स्थाने स्वाश्वेत्येवंरीत्या स्थान्यादेश-भावकल्पनेऽपि 'स्वाश्व' शब्दे स्वशब्दत्वातिदेशासम्भवात् । एवञ्चप्राचीनमतमेव युक्तमिति दिक् ।

३०—ऋति सवर्णे ऋवा ।

अकः सवर्णे ऋतिपरे पूर्वपरयोः स्थाने ऋकारादेशो वा भवतीति वार्तिकार्थः। तेन "दध्यृकार" इत्यादौ न ऋकारादेशः । एवमकःसवर्णे ऌति परेपूर्वपरयोः स्थाने (ऌ) इत्यादेशो वा भवतीत्युत्तर-वार्तिकार्थः । एतद्विधेययोः "अ इ उ ण्" सूत्रानन्तरं पाठेनाच्त्वात्तयोः स्थाने प्लुत-सिद्धिः । अण्त्वाभावाच्च न तयोरपर त्वम् पूर्व-वार्तिकेन द्विमात्रमेवमुत्तरवार्तिकेनाऽपि द्विमात्रं विधीयते। अत एव "अकःसवर्णे" इत्यनेनैव ऋकार-द्वय-स्थाने रेफद्वयवत्तारूपगुणकृतान्तर्येण कदाचिद् रेफद्वयगर्भस्य ऋकारस्य सिद्धया, विवृतत्वान्तर्येण कदाचिद् विवृतस्य, ऌकारे लकारवत्तान्तर्येण कदाचिद् द्विलकारस्य, कदाचित् विवृतत्वसाम्येन रेफ-वत्ताद्वयसाम्येन च तादृशस्य ऋकारस्य सिद्धया, वचनद्वयं भाष्ये प्रत्याख्यातम् । रेफद्वयवति स्थानिनि पूर्ववार्तिकम् । लकारद्वयवतिस्थानिनि द्वितीयवार्तिकं प्रवर्तते । वार्तिकद्वयविधेययोरभितोऽज्भक्तिसत्त्वे प्रमाणं तु भाष्यमेव । तथाहि "वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते" इतिपक्षे 'मातृणामि' त्यादौ, "अट्कुप्वाङ्" इत्यनेनैव णत्वं संसाध्य "ऋवर्णान्नस्ये"तिवार्तिकं प्रत्याख्यातम् । वर्णग्रहणेन वर्णैकदेशानां ग्रहणे प्रक्लृप्य, खट्वाभि, वांचा तरतीत्यादौ तुगैस् द्व्यज् लक्षण-विधीनां प्राप्तिं संदिह्य "दीर्घादि" ति तुग्विधानसामर्थ्य, तपरकरणसामर्थ्य, "नौ-द्वयच इतिसूत्रस्थनौग्रहणसामर्थ्यैर्भेदेनाप्रतिभासमानेषु वर्णावयवेष्ववयवसदृशस्वतन्त्र वर्णाश्रयकार्याभावज्ञापनसमाधानं यथा भाष्ये कृतं तथा प्रातर् ऋतमित्यत्र "रोरी" इत्यस्यतद्ऌकार इत्यादौ "तोर्लि" इत्यस्य च शंका-समाधानाकरणेन पूर्वभागस्याज्-भक्तत्वम् । यत्तद्रेफात्परं भक्तेरिति "हयवरट्" सूत्रस्थभाष्येण च परभागस्याज्-भक्तत्वम् । ह्रस्वऋकारद्वयस्थानिकैकादेशेपूर्वस्य, ह्रस्वऋकारऌकारस्थानिकैका

देशेचोत्तरस्य साधुत्वम् । अतएव वार्तिकद्वये तपर-करणं चरितार्थम् । उपस्थितरेफीयप्रयत्नत्यागे मानाभावादीषत्स्पृष्टाविमौ इतिदिक् ।

३१—हैहेप्रयोगे हैहयोः ।

ननु हैहयोः सम्बोधन-द्योतकत्वेन केवलाभ्यामपि हैहेशब्दाभ्यां सम्बोधन-दर्शनेन च तयोरपि हूयमानार्थपदत्वाद् "गुरोरनृत"इत्येव सिद्धे सूत्रमिदं व्यर्थमिति चेन्न, हैहेप्रयोगे हैहयोरेवेति नियमार्थंसूत्रस्यावश्यकत्वात् । ननु "वाक्यस्यटे" रित्युक्तेः कथं "हे३राम" इत्यत्र प्लुत इतिवाच्यम् । "हैहेऽन्ते" इत्येव सिद्धे प्रयोगग्रहणेनानन्तयोरपि तयोः प्लुतविधानात् । केचित्तु—"वाक्यस्यटे" रित्यधिकारादन्त्ययोरेव हैहेशब्दयोः प्लुतःस्यान्नत्वनन्त्ययोस्तदर्थं सूत्रे हैहेग्रहणम् । 'राम हे' इत्यादौ सम्बोधनोत्तरं हैहेप्रयोगे सति सम्बोधनविभक्त्यन्तेनैवाभिमुख्यस्य द्योतितत्वेन द्योत्यार्थाभावादनर्थकयोरपि हैहयोः प्लुतविधानार्थं सूत्रे प्रयोगग्रहणम् । हैहयोर्हूयमानार्थपदत्वे मानाभावादप्राप्तप्लुतविधानार्थं विध्यर्थमिदं सूत्रम् । अतएवात्र प्लुतसमावेशः सिद्ध्यति । वस्तुतस्तु—हैहयोरित्येको योगः, वाक्यघटक-हैहयोः प्लुतस्स्यादिति तदर्थः । हैहेप्रयोगे इति द्वितीयो योगः, पूर्वयोगात् हैहयोरित्यनुवर्तते, हैहेप्रयोगे हैहयोः प्लुतः स्यादिति द्वितीय-योगार्थः । पूर्वेणैव सिद्धे द्वितीययोगो नियमार्थः हैहेप्रयोगे हैहयोरेवेति । केचित्तु अयहूयमानार्थपदस्य टेः प्लुतस्य बाधकः, तक्रकौण्डिन्यन्यायादिति वदन्ति, तन्न 'शिवहे' इत्यादौ तस्याप्राप्तेः, तक्रकौण्डिन्य-न्याय-विषयाभावादिति दिक् ।

३२—ईचाक्रवर्मणस्य ।

उपस्थिते प्राप्तेऽनुपस्थिते चाप्राप्ते, उभयत्र विभाषेयम् । भाष्ये-किमर्थमिदमुच्यतेऽनुपस्थितार्थं, तत्र 'ई' ग्रहणेन नार्थः । अविशेषेण चाक्रवर्मणस्याप्लुतवदित्येव ।' अतएव वशा इयं वशेयमित्यत्राप्लुतवद्भावः सिद्धः । एवञ्च फलभेदे प्रत्याख्यानासंगत्या सूत्रमतेऽप्युपस्थिते पूर्वविप्रतिषेधेन ई ग्रहणेऽपि नित्याप्लुतवद्भाव एवेष्टः । प्रत्याख्याने नित्याप्यतवद्भावस्य येननाप्राप्ति-न्यायेन वैकल्पिकतद्बोधिताभावांशबाधकत्वात् । तथाचोभयत्रविभाषेयमिति कैयटोक्तिर्न युक्ता, भाष्यविरोधात् । इतिशब्दभिन्ने ऽवैदिकेति शब्दे चेति विकल्पविधानादुभयत्र विभाषेति मूलं व्याख्येयमिति दिक् ।

३३—निपात एकाजनाङ्।

ननु प्रेदमित्यादौ प्रगृह्यसंज्ञा कुतो नेति चेन्न, निषादस्थपत्यधिकरणन्यायेन सूत्रे एकश्चासौ अजितिकर्मधारयाश्रयणात्। 'व्याहरति मृगः' इत्यादिनिर्देशाच्च। अनाङिति पर्युदासो लाघवात्। अतएवैकाज्नाङिति पाणिनिना न्यासो न कृतः। वासुदेववाचकस्य अशब्दस्य, आङा सहाव्ययीभावे आ आत् अमित्यादौ पूर्वान्तवद्भावेन निपातत्वात् स्वत आङ्भिन्नत्वाच्च प्रगृह्यसंज्ञापत्तिस्तु न, पूर्वान्तवत्वेनाऽऽङ्त्वातिदेशेऽतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्यनिवृत्तेरिति परिभाषया तस्या अप्राप्तेः। किञ्चापरनिमित्तकत्वेनान्तरङ्गत्वात् पूर्वं नपुंसकह्रस्वे पश्चात् सवर्णदीर्घे अमितिरूपस्यैव न्याय्यत्वाच्च। नचाङिति पर्युदासाश्रयणे प्रतिषिद्धार्थोऽयमारम्भ इति "ओत्" सूत्रस्थभाष्यासंगतिरिति वाच्यम्, पर्युदासेऽपि गम्यमानप्रतिषेधमादाय तदुपपत्तेः। नचाङिति पर्युदासाश्रयणे तस्मादेव निपातैकाज्रूपत्वे लब्धे सूत्रे निपातैकाज्ग्रहणं व्यर्थमिति वाच्यम्, स्पष्टार्थत्वात्। नच न स्वाङ्गसमुदायः स्वाङ्गग्रहणेन गृह्यते इति भाष्यसिद्धान्तवदच्समुदायेऽच्त्वाभावाद् अच् इत्येतावन्मात्रोक्त्यैवाच्समुदायनिराशे सिद्धे सूत्रे एकग्रहणं व्यर्थमिति वाच्यम्, वर्णग्रहणे जातिग्रहणमितिपरिभाषाज्ञापनाय तस्यावश्यकत्वात्। तेन धिप्सतीत्यादि प्रयोगसिद्धिः। एवञ्च तितउ शब्दस्यैकदेशस्य 'अ उ' इत्यस्यानुकरणे 'अउ अकरोत्' इत्यत्र "अनुकरणं चानिति" इत्यनेन निपातत्वेऽपि प्रगृह्यसंज्ञाभाव एकग्रहणफलमिति दिक्।

३४—उञः, ऊँ।

अत्र सूत्रे लक्षणप्रतिपदोक्तपरिभाषया निपातस्योञो ग्रहणम्। "उञःऊँ" इत्येकसूत्रत्वे शाकल्यग्रहणाननुवृत्तौ (ऊँ) इत्येकमेवरूपं स्यात्। प्रगृह्यसंज्ञाप्रकरणेन प्रगृह्यत्वस्यादेशस्य च सह-विधानात्। तथा च (उ) इति वितीति च न स्यात्। स्थानिवृत्तिप्रगृह्यत्वस्याऽऽदेशे स्थानिवद्भावात् प्रगृह्यत्व-कार्यम्। प्रगृह्यत्वस्य साक्षादुद्देश्यसम्बन्धस्य क्लृप्ततया विधेयविशेषणत्वे मानाभावात्। शाकल्यग्रहणानुवृत्तावपि प्रगृह्यत्वस्य (ऊँ) आदेशस्य च विकल्पे (ऊँ) इति वितीति सिद्ध्यति, नतु (उ) इति। प्रगृह्यत्वविकल्पेन पक्षेऽभावविधायकत्वादेतदभावे निपात इत्यस्याप्रवृत्तेः। तदुक्तं भाष्ये—किमर्थो योग-विभागः। शाकल्यमते (ऊँ) विभाषा यथास्यात्। (ऊँ) इति (उ) इति। अन्येषामाचार्याणां मतेन

'विति' अनेन भाष्येण योगविभागस्य (उ) इतिरूपसिद्धिः फलं स्पष्टमेव लभ्यते ।

"उञः" इति योगे शाकल्यस्येतौ प्रगृह्यमित्यनुवर्तते । विकल्पानुवृत्तौ हि "निपात एकाजनाङ्"त्यैवसिद्धे सूत्रमिदं व्यर्थमेव स्यात् । तथा च प्राप्त-विभाषेयम् । (ऊँ) इति योगे शाकल्यप्रगृह्यपदयोरसम्बन्धे (उञः) इत्यर्थाधिकारा-दप्रगृह्यस्यैवाऽऽदेशे तस्य (इको यणचि), इति यणि (ऊँ) इति रूपासिद्धिः, दीर्घोच्चारण-वैयर्थ्यापत्तिश्च । विकल्पमात्र-सम्बन्धेऽपि (ऊँ) इत्यस्यासिद्धिः । तथा च (ऊँ) इति विधान-सामर्थ्यात् प्रगृह्य-पद-सम्बन्धः । प्रगृह्यपदमात्र-सम्बन्धेऽर्थाधिकारादप्रगृह्यस्य नित्ये (ऊँ) आदेशे (ऊँ) इति प्रगृह्यस्य (उ इति) सिद्धेऽपि 'विति' इति न सिद्ध्येत् । तस्मादुभयोरनुवृत्तिः । नन्वेवं संज्ञादेशोभय-विधाने वाक्यभेदापत्तिरिति वाच्यम्, विशिष्टस्य विधानेनादोषात् । अतएव भाष्ये प्रगृह्य-संज्ञकश्चेत्युक्तम् ।

वस्तुतस्तु—उञमुद्दिश्य संज्ञादेशयोः सह-विधानमेव न्याय्यम् । आदेशे स्थानिवद्भावात् प्रगृह्य-कार्यमिति दिक् ।

अथ हल्-सन्धि-प्रकरणम् ।

३५—यथासंख्यमनुदेशः समानाम् ।

सम्यक्ख्यानं संख्या, क्रम-वैशिष्ट्येन ज्ञानमर्थः । यत् सांख्यैः प्राप्यते स्थान-मित्यत्र संख्याशब्दस्य ज्ञानार्थकत्व-दर्शनात् । अनुपूर्वकदिश्धातोः पश्चाद्भवज्ञान-मर्थः । अनुदिश्यतेऽनेनेति करणे घञ् । अनुदेश-पदेनोपस्थितिपश्चाद्भवशाब्द बोधविषयीभूताऽऽकांक्षाभास्यसम्बन्ध उच्यते । अनोः पश्चादर्थकत्वात्, दिशेर्ज्ञानार्थ-कत्वात्, समानामिति चावर्तते । एकत्रानुयोगित्वमपरत्रप्रतियोगित्वं च षष्ठ्यर्थः । समानामित्यस्य तुल्यसंख्यावतामित्यर्थः । यथासंख्यमित्यस्य संख्यातिक्रमण कर्तृत्वाभाववान् अर्थः । एवञ्च तुल्य-संख्यप्रतियोगिकः, तुल्यसंख्यानुयोगिकश्चा-कांक्षाभास्यसम्बन्धः संख्याकर्मकातिक्रमणकर्तृत्वाभाववान् भवतीति सूत्रार्थः । संख्याकर्मकातिक्रमणकर्तृत्वञ्च स्वप्रतियोगिवृत्त्यपेक्षाबुद्धिविशेषविषयताविजातीया-पेक्षाबुद्धिविशेषविषयतावदनुयोगिकत्वम् । तदभावश्च—स्वप्रतियोगिवृत्त्यपेक्षाबुद्धि-विशेषविषयतासजातीयापेक्षाबुद्धिविशेषविषयतावदनुयोगिकत्वकम् । साजात्यञ्च—

स्वनिरूपकापेक्षाबुद्धिनिष्ठजनकतानिरूपितजन्यतावच्छेदकसंख्यात्वव्याप्यजात्यवच्छिन्न-जन्यतानिरूपितजनकतावच्छेदकत्वं, स्ववृत्ति स्वनिरूपकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारता-निरूपितैकत्वविशिष्टत्वावच्छिन्नधर्मितात्व, स्ववृत्ति स्वनिरूपकापेक्षाबुद्धीयैकत्वनिष्ठ प्रकारतानिरूपितैकत्वानवच्छिन्नधर्मितात्वैतदन्यतरवत्वमेतदुभयधर्मेण। यथा—"समूलाकृतजीवेषु हन्कृञ्ग्रहः" इति। नच "शत्रुं मित्रं विपत्तिञ्च जय रञ्जय भञ्जय" इत्यत्र यथा क्रमेणान्वयो भवति, एवं स्थानाख्यलौकिकप्रमाणादेव सकलेष्टसिद्धौ सूत्रमिदं विफलमिति वाच्यम्। "परस्मैपदानां" "एचोऽयवायावः" इत्यादौ शब्दतः सूत्रान्तस्थ-क्रममादाय सम्बन्ध-बोधार्थम्। "आद्यन्तौटकितौ" इत्यादौ समासनिर्देशे साहित्ये द्वन्द्वविधानादप्राप्तक्रमान्वय-बोधनार्थं च सूत्रस्यावश्यकत्वात्। स्वरितेनेत्यस्यापकर्षणात् "खयत्यात् परस्य" इत्यादौ न दोषः। प्रतिपत्तिकालिकमेव संख्यासाम्यमेतत्शास्त्रप्रवृत्त्युपयोगीति दिक्।

६—ङमो ह्रस्वादचि ङमुण्नित्यम्।

अत्र सूत्रे पदस्येत्यनुवृत्तम्। सामानाधिकरण्यानुरोधात्पञ्चम्या विपरिणम्यते। ङमिति च ह्रस्वादिति विशेषणसम्बन्धमनुभूय पदविशेषणत्वेन तदन्त-परः। ङम इति पञ्चमीबलादचीति षष्ठ्यर्थे सप्तमी। 'ङम उत्तरस्याचः' इति तस्मिन्निति सूत्रस्थभाष्यात्। तथाच ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो नित्यं ङमुडागमः स्यादिति सूत्रार्थः। भाष्ये तु विभक्तिव्यत्यय-कल्पने गौरवात् पदावयवङमः परस्येति वैयधिकरण्यमेवोक्तम्। नचैवं 'दण्डिने' त्यत्र ङमुडागमापत्तिरिति वाच्यम्। "उञि च पदे" इत्यतो मण्डूकप्लुत्या 'पदे' इत्यनुवर्त्याजादेः पदस्य ङमुडित्यर्थस्वीकारेणादोषात्। सामानाधिकरण्यान्वय-पक्षेऽपि 'परमदण्डिना' इत्यत्र प्रत्ययलक्षणेन, दण्डिन्नित्यस्य पदत्वात्ङमुड्-वारणाय पदे इत्यनुवृत्तिरावश्यकी। नच "उत्तरपदत्वे चापदादिविधौ" इत्यनेन प्रत्ययलक्षणनिषेध इति वाच्यम्? यत्रोत्तरपदस्य कार्यित्वं तत्रैव तत्प्रवृत्तेः। अत-एव 'माषकुम्भवापेन' इत्यत्र प्रत्ययलक्षणेन कुम्भ इत्यस्य पदत्वात् "पदव्यवायेऽपि" इत्यनेन णत्व-निषेधसिद्धिः। नचैवं तेन निषेधेन सिद्धमिति भाष्यासङ्गतिरिति वाच्यम्। तस्यैकदेशयुक्तित्वात्। ननु 'पूर्वदण्डिप्रिय' इत्यत्र दण्डिन्नित्यस्य प्रत्ययलक्षणेन पदत्वान्नलोपो भवति। अतः उत्तरपदत्वे इत्यत्र मध्यमपद-स्वानाक्रान्तमुत्तरपदं ग्राह्यम्। माषकुम्भवापेनेत्यत्र कुम्भेत्यस्य मध्यमत्वा-

क्रान्तत्वात् निषेधाप्रवृत्त्या णत्व-निषेधस्य सूपपादत्वेन कार्यित्व-निवेशो विफल इति चेन्न स्वघटकार्थवदव्यवहितपूर्वत्वं, स्वघटकार्थवदव्यवहितोत्तरत्वं, स्वघटकत्वमेतत्त्रितयसम्बन्धेन यद्वृत्त्यारम्भकसुब्निमित्तकपदसंज्ञा चिकीर्षिता तद्वृत्तिविशिष्टत्वं मध्यमपदत्वमिति स्वीकारेण माषकुम्भवापेनेत्यत्र मध्यमपदत्व लक्षणानाक्रान्तत्वादुत्तरपदत्वेचेति निषेधाप्रवृत्तये कार्यित्वनिवेशस्यावश्यकत्वात् । नचैवं पदेव्यवाये इति सप्तमीसमासं स्वीकृत्य "अतद्धिते" इति वार्तिकं भगवता प्रत्याख्यातम् । तथा च माषकुम्भवापेनेत्यादौ फलभेदवारणाय पदपदं पदत्व-योग्योपलक्षणंस्वीकर्त्तव्यम् । एवञ्च माषकुम्भवापेनेत्यत्र कुम्भेत्यस्य पदत्वयोग्यत्वसत्त्वात् णत्वनिषेधसिद्धौ कार्यित्वनिवेशो विफल इति वाच्यम्, अटतीतिअट् परमश्चासौ अट् चेति परमाट् तस्मादाचारक्विबन्तात् क्विचि "तितुत्र"इतिसूत्रेणेडभावे 'परमाट्तिः, इत्यादौ ष्टुत्वनिषेधाय कार्यित्वनिवेशस्यावश्यकत्वादिति दिक् ॥ इतिहल्सन्धिः ॥

अथ विसर्ग-सन्धि-प्रकरणम् ।

३७—इणः षः

ननु "इदुदुपधस्य" इत्यनेनैव षत्वसिद्धौ सूत्रमिदं व्यर्थमिति चेन्न "सर्पिष्-पाशम्' गीष्पाशमित्यादौ "इदुदुपधस्ये" त्यस्यासिद्धत्वात् प्राप्तसत्त्वनिवृत्त्यर्थं दोष्कल्पमित्याद्यर्थञ्च सूत्रस्यावश्यकत्वात् । अत्र सूत्रे "अनव्ययस्य" अपदादौ, काम्येरोरेवेति च सम्बध्यते । अतएव 'उच्चैः कल्पम्, दोः पश्य, गीः काम्यति, इत्यादौ न षत्वम् । अतएवात्रप्रकरणे सर्वत्र सत्वमेवविधेयम्, इणः उत्तरस्य विसर्गस्थानिकसस्यानेन षत्वमिति भाष्योक्तपक्षान्तरस्य संगतिः । पुँस्पुत्रः, इत्यादौ विसर्गस्थानिकसकाराभावान्न षत्वम् । अत्र पक्षे अनव्ययस्येत्यादीनां सम्बन्धाभावात् 'दुष्कृतम्' दुष्काम्यति, दुष्करोतीत्यादौ षत्व-सिद्धिः । गीः काम्यतीत्यादौ सकाराभावान्न षत्वम् । अयं पक्षो न समीचीनः । उत्तरसत्त्वस्यासिद्धत्वेन 'निष्कृतम्' इत्यादौ षत्वानुपपत्तेः । नच "प्रकरणे प्रकरणमसिद्धं न योगे योग इतिसिद्धान्तात् कथमसिद्धत्वमिति वाच्यम्, ज्ञापकासम्भवेनास्य पक्षस्यासम्भवात् । विसर्जनीयस्यैव षत्वमिति सिद्धान्त-पक्षे सकारषकारयोः स्वरितत्वेऽपि यथायोगं सम्बन्धः । वस्तुतस्तु—(इडायावा) इतिसूत्रात् प्राग् "इणः षः"इति सूत्रं कर्त्तव्यम् । इण उत्तरस्य विसर्गस्थानिकस्य षो भवतीति सूत्रार्थः । 'समः सुटि,' "पुमः खय्यम्परे"

कानाम्रेडिते इति सूत्रत्रयेण सकारस्यैव विधानेन तस्यासिद्धत्वाद् रुत्वाद्यभावे विसर्गस्थानिकसकाराभावात् पुँस्कोकिलः इत्यादौ न षः । एवञ्च कुत्रचित् स एव कुत्रचित् 'ष' इति कुत्रचिदुभयमनुवर्तते इति कल्पना न कर्त्तव्या भवति । अपि च "इणः षः" इति सूत्रेऽनव्ययस्य, काम्येरोरेव, अपदादौ, इत्यादीनां सम्बन्धश्च न कर्त्तव्यो भवतीति दिक् ।

३८—द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ।

कृत्वोऽर्थे वर्तमानानामेषां यो विसर्गस्तस्य षत्वमित्यर्थः । "सुचः" इत्येव सूत्रयितुमुचितम् । सुजन्तान्तस्य यो विसर्गस्तस्य षत्वमित्यर्थः । नच "सुचः" इति न्यासे चतुष्करोति चतुःकरोतीत्यादौ वैकल्पिकषत्वस्यासिद्धत्वान्नित्यषत्वापत्तिः । "सुचः" इति सूत्रस्य न वैयर्थ्यम् । विसर्गस्य प्रत्ययसम्बन्धित्वेन नित्यषत्वाप्राप्त्या द्विष्करोति, द्विःकरोतीत्यादौ चारितार्थ्यादिति वाच्यम् । 'द्वित्रिभ्यां सुच् , चतुरो लोपश्चे'ति न्यासेन चतुष्करोतीत्यादौ विसर्गस्य प्रत्ययसम्बन्धित्वेन नित्यषत्वाप्राप्त्याऽदोषादिति दिक् ।

३९—कृत्वोऽर्थे किं चतुष्कपालः ।

चतुः शब्दोऽव्युत्पन्न इत्यप्रत्ययस्येति निषेधाप्राप्त्या "इदुदुपधस्ये" ति नित्यं षः । अतएव चतुष्पाद्भ्यो ढञ् इत्यादिनिर्देशसंगतिः । चतुष्पञ्चाशदत्रापि षत्वसिद्धिः ।नच इदुदुपधस्य सस्य यो विसर्ग इति भाष्योक्तेः कथमत्र षत्वमिति वाच्यम् । विसर्गस्यपाठाभावेनोपधात्वासम्भवात् तत्स्थानिनिमित्तमुपधात्वं ग्राह्यमिति भाष्याशयात् । अतएव "समः सुटी"ति सूत्रभाष्ये सम्पुंकानामित्यनेन रुविधिरेवास्त्वित्याशंक्य 'पुंस्कामा' इत्यत्र षत्वापादानं संगच्छते । नच कृत्वोऽर्थे विद्यमानस्य पदस्य इदुदुपधस्य यो विसर्ग इत्यर्थात् पञ्चकृत्वः करोतीत्यादौ न दोषः । चतुष्करोतीत्यादौ नाव्याप्तिरिति द्विस्त्रिश्चतुरिति व्यर्थमिति वाच्यम् ! कृत्वोऽर्थे इत्यस्यासिद्धत्वेन चतुःशब्दे नित्यषत्वापत्तेः । प्रकरणे प्रकरणमसिद्धमिति पक्षस्तु दूषित एव । किञ्च पूर्वत्रासिद्धमिति पूर्वशब्देन प्रकरणग्रहणेऽव्यवहितप्रकरणे एव त्रिपाद्यसिद्धत्वं स्यात् । किञ्चास्याधिकारत्वात् प्रतिसूत्रमुपस्थित्या प्रतियोगमसिद्धत्वं दुर्वारमिति दिक् ।

४०—इसुसोः सामर्थ्ये ।

परस्परसाहचर्यात् प्रातिपदिकावयवयोरिसुसोर्ग्रहणम् । तेन पेचुः काष्ठैः, सख्युः

पाकः, कविभिः कृतमित्यादौ न षत्वम्। "नित्यं समासे" इतिसूत्रोदाहरणे समासविषये प्रातिपदिकावयवयोरेव सम्भवेनार्थाधिकारानुरोधाच्च। न च व्युत्पत्तिपक्षे इसुसन्ततदादेः पदस्यविसर्गस्य षः इत्यर्थात् कथं परमसर्पिष्करोतीत्यादौ षत्वम्। अवयवस्येसन्ततदादित्वेऽप्युत्तरपदत्वे चेति निषेधेनापदत्वादिति वाच्यम्? अनुत्तरपदस्थस्येति प्रतिषेधेन क्वचिद्विशेष्यान्तरसत्त्वेऽपि तदादिरूपं विशेष्यमादाय तदन्तविधिज्ञापनेनेसन्तमुसन्तञ्च यत्तदादि तदन्तंयत्पदमित्यर्थस्वीकारेणादोषात्। न च सापेक्षमसमर्थवद्भवतीति सिद्धान्तात् ब्राह्मणस्य सर्पिष्करोतीत्यादौ कथं षत्वमिति वाच्यम्। तस्यैकार्थीभावसामर्थ्यविषयत्वात्। सर्पिःकालकमित्यादावधात्वभिहितं समानाधिकरणमसमर्थवदिति सिद्धान्तान्न षत्वम्। धातुसहचरितप्रत्ययाभिहितार्थेन समानाधिकरणमसमर्थवन्नेति तदर्थः। अतएव सर्पिष्पीयते इत्यत्र षत्वसिद्धिः। यदा सर्पिरादिकमव्युत्पन्नं प्रातिपदिकमुणादिष्वव्युत्पत्तिपक्ष एव पाणिनिना स्वीकृतः। अतएव 'शङ्कः' इत्यादावादेशमाशङ्क्योणादीनांप्रतिषेधो वक्तव्यः, प्रातिपदिकविज्ञानाच्च भगवतः पाणिनेः सिद्धमित्युक्तम्। तदा नित्ये षत्वे प्राप्तेऽनेन विकल्पः। परमसर्पिष्करोतीत्यादौ षत्वविकल्पः सिद्धः, प्रत्ययग्रहणाभावेन तत्परिभाषाऽनुपस्थितेः। उत्तरपदस्थविसर्गस्य षत्ववारणाय "नित्यं समासे" इतिसूत्रेऽनुत्तरपदस्थस्येति। समासे नित्यषत्वस्य इदुदुपधस्येत्येव सिद्धेः सूत्रे नित्यग्रहणं विफलमेव। सर्पिषा इत्यादौ षत्वं तु बाहुलकादिति दिक्। इति विसर्ग-सन्धिः।

अथ स्वादिसन्धि-प्रकरणम्।

४१—एहि सुस्रोत अत्र स्नाहि।

ननु 'एहि सुस्रोत अत्र स्नाही' त्यत्र प्लुते कृते ऽतःपरत्वाभावादेवोत्वाप्राप्तौ अतोरोरप्लुतादप्लुते" इति सूत्रेऽप्लुतादितिव्यर्थमिति चेन्न। उत्वं प्रति प्लुतस्यासिद्धत्वादतःपरत्वेनोत्वापत्तेः। अप्लुताद्ग्रहणे कृते तु तत्सामर्थ्यादुत्वं प्रति प्लुतस्यासिद्धत्वं न भवतीति ज्ञापनान्न दोषः। 'आश्रयात् सिद्ध' इतिभाष्योक्तेः। न च पयस्यटति; पयोददातीत्यर्थे "आगच्छ हे पयो३ द्, पयो३द इत्यादौ कथमुत्वमिति वाच्यम्। एकपदस्थवर्णद्वयापेक्षमन्तरङ्गमुत्वं प्रति वाक्यसम्पादकपदान्तरसापेक्षप्लुतस्यासिद्धत्वेनादोषात्। अन्यथोत्वदृष्ट्या प्लुतस्यसिद्धत्वात् परत्वात् प्लुते आद्येऽप्लुतपरत्वाभावात्, अन्त्येऽप्लु तात्परत्वाभावादुत्वं न स्यात्। नचान्तरङ्गपरिभाषा

दृष्ट्या पूर्वत्राऽसिद्धमित्यनेन बहिरङ्गस्य त्रैपादिकप्लुतस्यासिद्धत्वात् कथमुत्वम्प्रत्यसिद्धत्वं प्रतिपादयेदिति वाच्यम्, स्वदृष्टयाऽविद्यमानस्यघटादेःपरंप्रत्यविद्यमानत्वप्रतिपादनवत् परिभाषादृष्ट्याऽसिद्धस्यापि प्लुतस्य परमुत्वम्प्रत्यसिद्धत्वप्रतिपादनसंभवात्। अन्तरङ्गस्यासिद्धत्वे तु प्रतिपाद्याभावे कं प्रत्यसिद्धत्वं प्रतिपाद्येत। हे पयो३ट् इत्यत्र वाक्यस्यटेरित्यनेन 'अट्' शब्दाकारः प्लुतः। हे पयो३द इत्यत्र रेफदकारसंयोगपरत्वेनाकारस्य गुरुत्वात् "गुरो" रिति प्लुतः। अप्लुतग्रहणसामर्थ्यात् पूर्वत्रासिद्धमित्यनेन प्राप्तस्यासिद्धत्वस्यबाधो न तु बहिरङ्गासिद्धत्वस्य। 'सुस्रोतः' इत्यादावेकवाक्यमात्रसापेक्षत्वात् प्लुतोऽन्तरङ्गो, भिन्नवाक्यस्थाकारसापेक्षत्वादुत्वं बहिरङ्गमिति दिक्।

४२—नह्ययमल्विधिः।

ननु देवार् सन्तीत्यत्र पूर्वत्रैपादिकविसर्गदृष्ट्या यत्वस्यासिद्धत्वात् विसर्गेण देवाः सन्तीति प्रयोगसिद्धौ "भोभगो" इति सूत्रेऽशि ग्रहणं व्यर्थमिति चेन्न, स्थानिवद्भावेन रुत्वाद् यत्वापत्तेः। अनल्विधाविति निषेधस्य तु न प्राप्तिः, रुत्वस्याल्विधित्वाभावात्। स्थानिरूपो योऽल् तद्वृत्ति र्यो धर्मस्तन्निमित्तके विधौ न स्थानिवदिति भाष्यसम्मतेऽर्थे तु रेफस्य विसर्गस्थानित्वेन तद्वृत्तिरुत्वस्याल्विधित्वात् "अनल्विधावि" तिनिषेधेन रुत्वानयनासम्भवात्, अशीत्यस्य फलं 'पयःसु' इत्यादौ बोध्यम्। यदि"रोःसुपि" इत्यस्य रोरेफस्य विसर्ग इत्यर्थः स्वीक्रियते तदाऽशग्रहणं व्यर्थमेव, अल्विधित्वेन स्थानिवद्भावाप्राप्तेः। नच हेराम इत्यत्र "एङ्ह्रस्वादि"त्यनेन सस्य लोपे तद्वृत्तिसुप्त्वस्याल्धर्मत्वेन स्थानिवत्वाभावात् पदत्वानुपपत्तिरिति वाच्यम्। राम स् इति बुद्धिप्रसङ्गे 'राम' इति बुद्धिः कर्त्तव्येत्यानुमानिकस्थानिवद्भावेन सुबन्तत्वस्य तत्प्रयुक्तकार्यस्य वा लाभेन तदुत्पत्तेः। प्रत्ययलक्षणेन तु न पदत्वलाभः। लक्षणपदोपादानेन प्रत्ययनिमित्तकार्यस्य तन्निमित्तकव्यवहारस्यवाऽतिदेशादिति दिक्। इति पञ्चसन्धिः।

अथाजन्त-पुल्लिङ्ग-प्रकरणम्।

१—अर्थवदधातुरप्रत्ययःप्रातिपदिकम्।

प्राचीनमतेऽत्र सूत्रे वृत्तिमत्त्वमर्थवत्वमुत्तरसूत्रे चैकार्थीभावेन लौकिकप्रयोगे

प्रसिद्धत्वमर्थवत्त्वम् । कृत्तद्धितान्तञ्चैवार्थवन्नतु केवलाः कृतस्तद्धिता वेति भाष्यात् । प्राचीनमते उभयसूत्रे विभिन्नार्थवत्त्वद्वयस्वीकारेऽर्थाधिकारं परित्यज्य शब्दाधिकारकल्पने, प्रत्ययपर्युदासकरणे च गौरवं भवति । तस्मात् सूत्रद्वये एतत् संज्ञाफलभूतविभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वमर्थवत्त्वं ग्राह्यम् । अतएव सूत्रेऽर्थवद्ग्रहणं चरितार्थम् । अन्यथाऽधातुरितिपर्युदासेनार्थवत्त्वे लब्धे कृदादीनामनर्थकानामप्रसिद्धेस्तद्वैयर्थ्यं स्पष्टमेव । नच नञिव युक्तमन्यसदृशाधिकरणे तथाह्यर्थगतिरितिन्यायानित्यत्वज्ञापनार्थमर्थवद्ग्रहणमिति वाच्यम् । एतस्यानित्यत्वज्ञापने भाष्यसम्मतदृढतरफलाभावात् । भाष्येऽपि नहि लोके केवलेन प्रत्ययेनार्थोगम्यते केन तर्हि ? सप्रकृतिकेन । भर्तृहरिणाऽपि प्रोक्तम्-धात्वादीनां विशुद्धानां लौकिकोऽर्थो न विद्यते । कृत्तद्धितानामर्थश्च केवलानामलौकिकः । प्राग्विभक्तेस्तदन्तस्य तथैवार्थो न विद्यते । अतएव संज्ञाविधाविति निषेधात् कृत्तद्धितेति सूत्रेऽन्तग्रहणं कर्त्तव्यं न कर्त्तव्यमर्थवदिति वर्तते । कृत्तद्धितान्तञ्चैवार्थवन्नतुकेवलाः कृतस्तद्धिता वेति भाष्यमुपादाय वृत्तिमत्त्वरूपार्थवत्त्वग्रहणेऽर्थवद्ग्रहणानुवृत्तिवैयर्थ्येन तदनुवृत्तिसामर्थ्याल्लौकिकार्थ प्रत्यासन्नोऽभिव्यक्ततरो योऽर्थःप्रत्ययान्तेषु लक्ष्यते स आश्रीयते इतिकैयटेनोक्तम् । पूर्वसूत्रे विलक्षणार्थवत्त्वलाभायार्थवद्ग्रहणस्य चारितार्थ्येऽप्युत्तरसूत्रे तदनुवृत्तिर्व्यर्था । तत्सामर्थ्यादत्रापितादृशार्थवत्त्वमेव । अतएव प्रत्ययान्ततदादे र्यदिप्रातिपदिकसंज्ञा स्यात् तर्हि कृत्तद्धितान्तयोरेवेति कृत्तद्धितग्रहणस्य नियमार्थवत्वेन ह्रस्वो नपुसंके यत्तस्येति न्यासेन सिद्धे सत्त्वप्रधानप्रातिपदिकस्यैव ह्रस्व इति प्रातिपदिकग्रहणकृतनियमेन च काण्डे इत्यादौ ह्रस्ववारणात्, फलाभावेन वा भाष्योक्ते प्रत्ययान्ततदादिपर्युदासप्रत्याख्याने पञ्चनावप्रिय इत्यादौ पञ्चनावेत्यस्य नानेन प्रातिपदिकत्वं नाप्युत्तरसूत्रेण । एवञ्च प्रत्ययस्य प्राप्त्यभावात् प्रत्ययपर्युदासो विफलः । नचैतादृशार्थवत्त्वस्वीकारे रमागौरीत्यादौ ङीप्टाप्समभिव्याहारापेक्षयैवार्थबोधकत्वात् रम्गौर्इत्यत्रार्थवत्वं न स्यादिति वाच्यम् । विभक्तिपदस्य प्रत्ययोपलक्षणत्वस्वीकारात् । नचैवमपि इन्द्राणीत्यादौ 'इन्द्र' इत्यत्रार्थवत्वं न स्यात् । आनुक्समभिव्याहारापेक्षयैवार्थबोधकत्वादिति वाच्यम् । एतत्संज्ञाफलभूतेतरसमभिव्याहारानपेक्षयेत्यादिपरिष्कारेणादोषात् । नचैवमपि (एधाञ्चक्रे) इत्यत्रैधामित्यस्यार्थवत्वं न स्यात्'चक्रे'समभिव्याहारापेक्षयैवार्थबोधकत्वादिति

वाच्यम् । एतत्संज्ञाफलभूतेतरपदेतरेत्यादिलक्षणस्वीकारेणादोषात् । नचैवमपि "पञ्चगवधन" इत्यत्र पञ्चगवेत्यस्यार्थवत्त्वापत्तिः । धनरूपपदेतरघटपटादिसमभिव्याहारानपेक्षयैवार्थबोधकत्वादितिवाच्यम् । स्वोद्देश्यसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकतापर्याप्त्यधिकरणत्वमर्थवत्त्वमितिस्वीकारादिति दिक् ।

२—कृत्तद्धितसमासाश्च ।

ननु 'राजन्-ङस् पुरुष-सु' इति समुदायस्यप्रत्ययान्ततदादिभिन्नत्वात् पूर्वं सूत्रेणैव प्रातिपदिकत्वसिद्धौ समासग्रहणं यत्र संघाते पूर्वोभागः पदं तस्य चेद्भवति तर्हि समासस्यैव । तेन 'राज्ञः-पुरुष' इति वाक्यस्य नेति भट्टोजिदीक्षितो नियमस्य सजातीयविषयत्वात् साजात्यं प्रदर्शितवान् । **नियमाकारस्तु**—अर्थवत्समुदायानां समासग्रहणं नियमार्थम् । सुबन्तानां समासग्रहणं नियमार्थमिति भाष्येण भेदसंसर्गद्वारकार्थवन्त उपलक्ष्यन्ते इति कैयटेनोक्तम् । अतएवगवित्ययमाहेति समुदायस्य न प्रातिपदिकसंज्ञा । गो, इत्यादीनां सुबन्तत्वाभावेऽप्यनुकरणं चानितिपरमिति शास्त्रबलेनानितिपरस्याऽपि प्रयोग-सत्त्वेन गो इत्येतावन्मात्रस्यापि पृथक्प्रयोगार्हत्वात् । 'बहुपटव' इत्यत्र प्रातिपदिकत्वसिद्धये स्वातन्त्र्येणेति । पुत्रकाम्येत्यादौ प्रातिपदिकत्वसिद्धये उत्तरभागोऽपि स्वातन्त्र्येण प्रयोगार्हार्थवानेव गृह्यते । तथा च स्वातन्त्र्येण प्रयोगार्हार्थवत्, पूर्वावयवकस्वातन्त्र्येण प्रयोगार्हार्थवदुत्तरावयवकसमुदायस्य चेत्प्रातिपदिकसंज्ञा तर्हि समासस्यैवेति नियमाकारः । अतएव प्रत्ययग्रहणपरिभाषायाः फलनिरूपणावसरे 'देवदत्तो गार्ग्य' इतिसमुदायस्य यञन्ततदादित्वाभावेन प्रातिपदिकसंज्ञाऽभावः सिद्ध्यति । यथाश्रुतमूलोक्तनियमे तु नियमेनैव प्रातिपदिकत्वाभावसिद्ध्या भाष्यासङ्गतिः स्पष्टैव । न च शशशृङ्गमित्यादौ प्रातिपदिकत्वसिद्धये समासग्रहणमिति वाच्यम् । बौद्धार्थमादाय पूर्वसूत्रेणैव तदुपपत्तेः । स्वप्नाद्यनुरोधेन च बौद्धपदार्थस्यावश्यकत्वात् । नचाग्नौहिणीरथन्तरादिपदेषु, अवयवानामत्यन्तनैरर्थक्यादवयवानां प्रातिपदिकसंज्ञाऽभावादक्षाणामूहिनीत्यादिरूपेण षष्ठीसमासादेरप्रसंग इति वाच्यम् । अन्यत्र दृष्टार्थारोपेण तदुपपत्तेः । एवञ्च यत्तच्छब्दयोरननुगतत्वेन नायं नियमः सम्भवति । नच दीक्षितबुद्धिस्थे प्रकृते यत्तत्पदयोः शक्तिस्वीकारेणानुगमो भविष्यतीति वाच्यम् । दीक्षितोत्पत्तेः प्राक् तदीयबुद्धेरभावेन तदानीमपि समासग्रहणकृतनियमेनार्थवत्सूत्रे संकोचस्यावश्यकत्वेनाऽस्य नियमस्याप्रयोजकत्वात् । नच पूर्वपदावयवकसमुदायस्य चेत्तर्हि

समासस्यैवेति नियमादनुगमो भविष्यतीति वाच्यम् । व्यवच्छेद्यानानुगमेऽपि तत्य-भावादिति केषाञ्चिदुक्तिरपि परास्ता । नियमशास्त्रसार्थक्याय प्रकृते व्यवच्छेद्यानुगम-स्याऽऽवश्यकत्वात् । 'यत्र संघाते' इत्यादेः साजात्यमात्रप्रदर्शनपरत्वाच्चेति दिक् ।

३—प्रत्ययः ।

प्रत्यय इति संज्ञाधिकारोऽयम् । अनाकृतिः संज्ञेतिभाष्यात् संज्ञात्वावगमो भवति । नचाधिकारेण प्रत्ययसंज्ञाविधाने विकारागमादीनां प्रत्ययसंज्ञापत्तिरिति वाच्यम् । प्रत्यय इति महासंज्ञाकरणेन स्वस्वप्रकृत्यन्यतरार्थप्रत्यायकस्यैव तत्संज्ञ-कत्वात् । अतएव नभवधाद्यादेशानां न प्रत्ययसंज्ञा । स्थान्यर्थेनैवार्थवत्त्वादेषां स्वार्थाभावात् । अतएव कोशादौ तदर्थकथनं नोक्तम् । भाष्येऽपि स्वीयमर्थं प्रत्याय-यन्तीति विग्रहे स्वीयपदोपादानम् । केचित्तु विकारागमादेशानां देशांशे निराकां-क्षत्वात् परश्चेत्यस्यानुपस्थितौ तत्सन्नियोगशिष्टप्रत्ययसंज्ञाया न प्रवृत्तिरिति वदन्ति, तन्न, देशांशे निराकांक्षत्वेन श्नमकज्बहुषु प्रत्यय-संज्ञाऽनुपपत्तेः । किञ्च-'लविषीय' इत्यत्र (लू-लिङ्) इत्यवस्थायां विशेषविहितत्वात् परत्वाच्च पूर्वं सीयुटि ततो लादेशे प्रत्ययसंज्ञासन्नियोगेनेटो विधीयमानमाद्युदात्तत्वं यदागमपरि-भाषाबलात् सीयुट एव स्यात् । अत आगमानुदात्तत्वं वक्तव्यमिति भाष्यकैयटा-संगतिः । लस्थानिकत्वेन देशांशे निराकांक्षत्वेन परश्चेत्यस्याऽप्रवृत्तौ प्रत्ययसंज्ञायाः प्रवृत्त्यभावेन तत्सन्नियोगकथनासंगतेरिति दिक् ।

४—परश्च ।

"गुप्तिज्किद्भ्यः" इत्यादौ विभागाभावेनापादानत्वासम्भवाद् दिग्योगलक्षणा पञ्चमी । तत्रानियतदिक्शब्दाध्याहारे प्रसक्ते पर एवेतिनियमार्थमिदम् । गापोष्ट-गित्यादौ गापोरनन्तरः टगित्यर्थे "परश्च" इत्यनेन पर एव प्रत्ययः । नच तस्मादित्युत्तरस्येत्यनेन षष्ठ्यंशरहिताव्यवहितोत्तरांशोपस्थित्या सकलेष्टसिद्धौ सूत्रमिदं विफलमितिवाच्यम् । प्रत्ययः परो भवत्येवेतिनियमार्थं सूत्रस्यावश्यकत्वात् । तेन न केवला प्रकृतिः प्रयोक्तव्या नापि केवलः प्रत्यय इति सिद्धम् । अतएव प्रकृत्यर्थमात्रविवक्षायां 'पच्' 'पत्' इति प्रकृतिमात्रस्य प्रयोगो न । नच गवित्ययमाहेत्यादौ कथं प्रकृतिमात्रस्यप्रयोग इति वाच्यम् । अनुकार्यानुकरण योरभेदविवक्षायामर्थवत्त्वाभावात् प्रातिपदिकत्वाभावेन (गो) इत्यस्य प्रकृति त्वाभावात् । प्रकृतित्वञ्च-प्रत्ययविधायुद्देश्यतावच्छेदकाक्रान्तत्वम् । नच लिङ्

इयानित्यादेः कथं प्रयोग इति वाच्यम्। अस्य न्यायस्य शास्त्राबोधितान्यतरप्रयोग विषयकत्वात्। एतन्न्यायमूलकमेव अपदं न प्रयुञ्जीत इति। परिनिष्ठितत्वञ्च-अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वमिति दिक्।

५—ङ्याप्प्रातिपदिकात्।

ननु परश्चेत्यनेन प्रकृतेराक्षेपात् प्रकृतेः परः प्रत्ययो भवतीत्यर्थेनैवेष्टसिद्धौ प्रातिपदिकाधिकारो व्यर्थः। नच तिङन्तात् स्वाद्युत्पत्तिवारणाय तदधिकार इति वाच्यम्। संख्याऽभावात्। संख्यायाः तिङोक्तत्वाच्च नापि धातुभ्यः स्वाद्युत्पत्तिवारणाय तदधिकारः, तिङामपवादत्वात्। तस्येत्यादिसमर्थविभक्ति निर्देशात् तमब्विधौ तिङश्चेतिज्ञापकाच्च, न तेभ्यस्तद्धितव्यावृत्त्यर्थं तदधिकार इति चेन्न, प्रातिपदिकाधिकाराभावे स्वार्थद्रव्यलिङ्गसंख्याकारकप्रयुक्तकार्यैः संस्कृतस्य बहिर्भूतापत्यादियोग इति "कुत्सिते" इति भाष्योक्तन्यानेन तस्यापत्यमित्यादेस्तत्सम्बन्ध्यपत्यमित्यर्थे प्रथमोच्चारितबोध्यात् प्रत्यय इत्यर्थसत्त्वेन सार्थक तद्धितानां सुबन्तादुत्पत्त्याऽनुदात्तादेरित्यस्य प्राधान्यादुपस्थितसुबन्तविशेषण त्वापत्तौ सर्वस्यविकारः सार्वः इत्यत्राञनापत्तेः। "सर्वस्यसुपि" इत्याद्युदात्तत्वात्। तदधिकार–सामर्थ्यात्त्वनुदात्तादेरितिप्रातिपदिकस्यैव विशेषणत्वमिति न दोषः, उञ्छादिगणे सर्वशब्दस्य पाठेनाऽन्तोदात्तत्वात्। नचान्तरङ्गानिति न्यायेन लुङ्निमित्तप्रत्ययात् पूर्वमाद्युदात्ताप्राप्त्या तस्यसुबन्तविशेषणत्वेऽपि न दोष इति वाच्यम्। धर्मिग्राहकमानादन्तरङ्गनिमित्तविनाशकलुकएव प्राबल्यबोधनेन प्रकृते प्रत्ययलक्षणेन सुबन्ततया उदात्तत्वापत्तेः। नच न लुमतेति निषेध इति वाच्यम्। सर्वस्य सुपीत्यत्र सौवरीणां सप्तमीनां तदन्तसप्तमीत्वात् प्रत्यये परतः पूर्वकार्यत्वाभावेन लुमतेत्यस्याप्रवृत्तेः। अतएव सर्वस्तोमादिबहुव्रीहेराद्युदात्तत्वसिद्धिः। नचानुदात्तादिप्रकृतिकषष्ठ्यन्तादित्यर्थेन न दोष इति वाच्यम्। गर्गादिभ्य इत्यादौ सुबन्तंप्रति गर्गादीनांविशेषणत्वासम्भवादगत्या लक्षणास्वीकारेऽपि प्रकृते लक्षणायां मानाभावात्। वस्तुतो गर्गादिभ्य इत्यत्रापि न लक्षणा। गर्गादिरूपात् प्रातिपदिकात् तत्सम्बन्ध्यपत्यमित्यर्थे प्रत्यय इत्यर्थे प्रातिपदिकात् परत्वं तद्व्यवधानेन भविष्यति तद्व्यतिरिक्तव्यवधाने तु न मानाभावादिति दिक्।

६—ङ्याब्ग्रहणप्रयोजनम्।

ननु लिङ्गविशिष्टपरिभाषायाः प्रातिपदिकसामान्यग्रहणे तद्विशेषग्रहणे च

प्रवृत्तिरितिभाष्यसिद्धान्तात्परिभाषयैव रमागौरीत्यादौ स्वाद्युत्पत्तिसिद्धौ सूत्रे ङ्याब्ग्रहणं व्यर्थमिति चेन्न ! ङ्याबन्तात्तद्धितोत्पत्तिर्यथास्यादितिज्ञापनार्थं तस्याऽऽवश्यकत्वात् । तेन 'आर्यिका, 'आर्यका, 'लोहिनिका, 'लोहितिकेति रूपसिद्धिः । नच ब्रह्मबन्धूतरा युवतितरेत्यादीनां सिद्धिर्न स्यादिति वाच्यम् । ङ्याब्ग्रहणस्य स्त्रीप्रत्ययमात्रोपलक्षणत्वस्वीकारात् । एतन्नियमस्यसमासान्ततिप्रत्ययाद्यतिरिक्तपरत्वस्वीकाराद् युवतिः, बहुगोमत्केत्यादौ न दोषः । अत्यन्तस्वार्थिकान् आरभ्य तद्धितेषु च ङ्याब्ग्रहणसम्बन्धस्तेषामतिरिक्तार्थाभावेन स्वार्थे पूर्णपदमर्थान्तरमभिकांक्षतीति न्यायाविषयतया सुबन्तात्तद्धित इति सिद्धान्तस्यङ्यापोः प्राक्प्रवृत्तेश्चाभावात् तेषु ङ्याब्ग्रहणासम्बन्धः । अतएव लोहिनिकेति प्रयोगसिद्ध्यर्थं "लोहिताल्लिङ्गबाधनंवा" इतिचरितार्थम् । अत्यन्तस्वार्थिकानां सुबुत्पत्तेः पूर्वमुत्पत्तौ मानं तु "सर्वस्य द्वे" इति सूत्रस्थभाष्यमेव । तथाहि पदस्येत्यस्य प्रयोजनं 'द्विपदिके' ति । तत्र द्वि, इत्यस्य पादेत्यस्य च पदत्वेऽपि तदर्थमात्रगतवीप्साया अभावात् , द्विपदेत्यस्य समुदितस्य वीप्सितत्वेऽपि पदत्वाभावात् , तद्धितान्तेन च वीप्साया उक्तत्वान्नद्विर्भावः । स्वार्थिकप्रत्ययानां सुबन्तादुत्पत्तौ द्विपादेत्यस्यापि प्रत्ययलक्षणेन पदत्वाद्भाष्यासंगतिः स्पष्टैव । किञ्च "गतिकारकोपपदानाम्" इति परिभाषायाः सांकूटिनमिति प्रयोजनमुक्तम् । तत्रहि सम्पूर्वक कूट् धातो र्घिनुण्प्रत्यये कूटिन् शब्दादण्प्रत्ययविभक्त्योः प्राप्तयोः स्वार्थिकत्वेनान्तरङ्गत्वादणि 'कूटिन्' इत्यस्यैव वृद्धिः स्यात् । अतो "गतिकारकोपपदानामि"ति परिभाषया सुबुत्पत्तेः पूर्वं समासे ततो विशिष्टादणि सांकूटिनमिति सिद्ध्यति । अत्यन्तस्वार्थिकस्यापि सुबन्तादुत्पत्तिस्वीकारे पूर्वं सुपि इनुणन्तत्वरूपाधिकसापेक्षत्वेन बहिरङ्गतयाऽणःपूर्वं समासे विशिष्टादणि भाष्यासंगतिः स्पष्टैवेति दिक् ।

७—सरूपसूत्रप्रयोजनप्रत्याख्यानप्रकारः ।

नन्वक्षा भज्यन्तां, भुज्यन्तां दीव्यन्तामित्यत्र 'अक्षाः' इति कारकस्य सकृदुपादानेऽपि यथा तन्त्रेण सर्वत्रान्वयो भवति तथा तन्त्रेणैवेष्टसिद्धे सूत्रमिदं विफलम् । तन्त्रकारणं शब्दानां तुल्यरूपता । एवमक्षो भज्यतां भुज्यतां दीव्यतामिति । तन्त्रं द्विविधम् । शब्दतंत्रमर्थतन्त्रञ्च । शब्दस्य पर्यायपरिवृत्त्यसहत्वे शब्दतंत्रम् । यथा-अक्षाः । तत्सहत्वेत्वर्थतंत्रम् । एवञ्च सूत्रमिदं व्यर्थमिति चेन्न, सरूपाणामेकशेष एवेति नियमार्थत्वात् । तेन प्रत्यर्थं शब्दनिवेश इति सिद्धान्तादनेकशब्दप्रयोगे

प्राप्तद्वन्द्वनिवृत्तिः। अयं नियमो विभक्तौ यानि सरूपाण्येव तद्विषयः सहविवक्षाविषयश्च। सहविवक्षाविषयत्वादेव विभक्त्यन्तानामेकशेष इति पक्षे "द्वन्द्वप्रतिषेधो वक्तव्य" इत्याशंक्यानवकाश एकशेषो द्वन्द्वं बाधिष्यते इति भाष्ये उक्तम्। किञ्चासहविवक्षायामेकशेषप्रवृत्तिस्वीकारे सहविवक्षायां द्वन्द्वस्येवान्यत्रकर्मधारयस्यापिबाधात् 'सारवसारवोर्मिजः' इत्यादिप्रयोगविरोधापत्तिः। न च सहविवक्षायामेकशेषस्वीकारे 'ब्राह्मणाभ्यां कृतं देहि' 'पयोजरयति, 'नीलोत्पलस्पर्धिनीनेत्रेतनुर्वाहरेः, 'विद्वन्मानसहंस' इत्यादि प्रयोगविरोधापत्तिरिति वाच्यम्। विभक्त्यन्ततन्त्रेण तदुपपत्तेः। असहविवक्षायामपि विभक्त्यन्ततंत्रस्वीकारात् "इदितो नुम्धातोः" इत्यत्र गुरुनिर्देशस्त्वन्यपदार्थज्ञानाय। भाष्येत्वर्थावर्थौ प्रति यत्, अर्थान् अर्थान् प्रतियत् तदपिप्रत्यर्थमेवेतिस्वीकृत्य सूत्रमिदं प्रत्याख्यातम्। नच घटघटाविति द्वन्द्वः कस्मान्न भवतीति वाच्यम्। अनेकघटादिपदानामनभिधानेन साहित्ये वृत्त्यभावबोधनात्। एकस्यैव त्वनेकार्थस्य तत्र वृत्तिरभिधानस्वाभाव्यात्। नचैवं द्विर्वचनेऽचीत्यत्रैकशेषव्यवहारो भाष्यकृतोऽनुपपन्न इति वाच्यम्। तत्रैकशेषशब्दस्य तन्त्रपरत्वात्। सचोच्चारयितुः, बोद्धुस्त्वावृत्तिरेवेति दिक्।

८—एवकारापकर्षः।

सरूपाणामिति सूत्रे एकविभक्ताविति पदाभावे प्रातिपदिकैकशेष इतिपक्षे कृतः पूर्वपक्षः। किमुच्यते प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधो वक्तव्य इति, न पुनर्यस्यापि विभक्त्यन्तानामेकशेषस्तेनाऽपि प्रतिषेधो वक्तव्य इत्यादि। विभक्तिपदाभावे यानि स्वरूपाणि तेषामेवैकशेष इत्येवार्थः स्यात्। तत्र प्रयोगमात्रावच्छेदेन सारूप्यग्रहणेहरिणहरितप्रकृतिकहरिणीशब्दादौ तद्धिते वैरूप्यादेकशेषो न स्यात्। प्रयोगसामानाधिकरण्येनैव सारूप्यस्य ग्रहणे मातृमात्रादावप्येकशेषापत्तिः। एवञ्च विभक्तेः सारूप्ये उपलक्षणत्वमाश्रित्य प्रातिपदिकानामेकशेष इति पक्षस्थापनेन मातृमात्रोः प्रतिषेधो वक्तव्य इति वार्तिकं प्रत्याख्यातं भाष्ये। एवकारापकर्षं विना विभक्तेःसारूप्योपलक्षणत्वमात्रेण वार्तिकखण्डनासम्भवादेवकारापकर्षो भाष्ये ध्वनितः। अपकृष्टस्यैवकारस्यसारूप्येऽन्वयः। तथाच विभक्तौ परतःसारूप्यमेव येषां दृष्टं तेषामेकः शिष्यते इति सूत्रार्थकरणात्, हरिणी च हरिणी चेत्यादावेकशेषः सिद्ध्यति। वस्तुतस्तु एवकारापकर्षे न मानम्। अतएव प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधो वक्तव्य इति प्रातिपदिकैकशेषे एव शंका कृता नतु विभक्त्यन्तानामेकशेष इति पक्षे। नच

मातृमात्रोः प्रतिषेध इति वार्तिके एकशेषाकरणेनैवकारापकर्षो ध्वनित इति वाच्यम्। अनुकरणस्वरूपभङ्गभिया तत्रैकशेषाकरणात्। एवञ्च भ्यामादौ उभयमते एकशेषः औ जसादौ उभयमते नैकशेषः।

८—स्ववृत्तिरूपविशिष्टरूपवद्भिन्नत्वं सरूपत्वम्।

वैशिष्ट्यञ्च—स्वभिन्नत्व, स्वाश्रयप्रकृतिकविभक्तिवृत्तिविभक्तिविभाजकधर्मवद्विभक्त्यव्यवहितपूर्वत्वसामानाधिकरण्यमेतदुभयसम्बन्धेन। एतादृशसारूप्यस्वीकारे सति, जराशब्दादावेकशेषानुपपत्तिः। तस्मात् स्वभिन्नत्वमित्यत्र स्वविशिष्टभिन्नत्वमितिरूपे वैशिष्ट्यं देयम्। अत्रवैशिष्ट्यम्—स्वसामानाधिकरण्य, स्वाश्रयप्रकृतिकेत्यादि। एवमपि नित्यैकवचनान्तैकशब्दस्य नित्यद्विवचनान्तद्विशब्दस्य चैकशेषापत्तिः। तस्मात् स्ववृत्तिरूपविशिष्टरूपवद्भिन्नत्वे सति स्वविशिष्टरूपवत्वं सारूप्यम्। सत्यन्तदले वैशिष्ट्यम्—स्वविशिष्टभिन्नत्व, स्वाश्रयप्रकृतिकविभक्तिवृत्तिविभक्तिविभाजकधर्मवद्विभक्त्यव्यवहितपूर्वत्वसामानाधिकरण्यैतदुभयसम्बन्धेन। सम्बन्धघटकवैशिष्ट्यञ्च—स्वसामानाधिकरण्य, स्वाश्रयप्रकृतिकेत्यादीत्युभयसम्बन्धेन। द्वितीयदले वैशिष्ट्यम्—स्वाश्रयप्रकृतिकविभक्तिवृत्तिविभक्तिविभाजकेत्यादिसम्बन्धेन।

९—एङ्ह्रस्वात् सम्बद्धेः।

अत्र सूत्रे सम्बुद्ध्याऽङ्गस्याऽऽक्षेपाद् येन यस्याऽऽक्षेपस्तस्यतत्रैवान्वय इति सिद्धान्तादङ्गात्परा या सम्बुद्धिस्तदवयवो यो हल् स च लुप्यते, स च हल् एङ्ह्रस्वाभ्यां परीभूतश्चेदित्यर्थे 'हेकतरदि'त्यत्र दकारस्यलोपापत्तिः। नच सा च सम्बुद्धिरेङ्ह्रस्वाभ्यां परीभूता चेदित्यर्थे नोक्त दोष इति वाच्यम्। 'हेकुल' इत्यत्र मलोपानुपपत्तेः। तस्मात् सम्बुद्ध्याक्षिप्तस्याङ्गस्यविशेष्यतया "एङ् ह्रस्वादि"त्यत्रान्वय इति भट्टोजिदीक्षितमतम्। वस्तुतस्तु यथा पीनत्वानुपपत्त्याऽनुमीयमानरात्रिभोजनस्य पीनत्वोपपत्तिः फलं, न तथा प्रकृतेऽनुमानेन सम्बुद्ध्युपपत्तिर्भवति। तथा च फलाभावादनुमानरूपाक्षेपो नैव सम्भवति। किंच प्रत्ययस्योत्पत्तावङ्गापेक्षत्वेऽपि ज्ञाने तदपेक्षत्वाभावेनशास्त्रे तदाक्षेपे मानाभावः। अतएव अङ्गस्येति सूत्रे तत्र स्थाने प्रत्यये इत्यधिकारः कार्य इतिपक्षे प्राकरोदित्यत्रोपसर्गात्पूर्वमडादिः स्यादित्याशंक्य प्रत्ययग्रहणपरिभाषया समाहितं भाष्ये, नत्वङ्गाक्षेपेण। एवञ्च सम्बुद्धेः प्रत्ययत्वेन प्रत्ययग्रहणपरिभाषया तदादीत्यंशोपस्थितिः। सचात्र योग्यतया पञ्चम्यन्तइतितद्विशेष्यक, एङ्ह्रस्वविशेषणकतदन्तपदोपस्थितौ एङन्ततदादेः ह्रस्वा-

न्तदादेः परस्य सम्बुद्धयवयवस्य हलो लोप इत्येवार्थ उचित इति दिक्।

१०—आदर्शेन।

नन्वादर्शेनेत्यत्राडादिव्यवधानसत्त्वात् णत्वं कुतोन ! नचाडादिव्यतिरिक्तशकारव्यवधानान्न णत्वमिति वाच्यम्, व्यवाये रषाभ्यामित्यनेनाप्राप्तणत्वविधानार्थमस्य विद्धयर्थत्वादितिचेन्न ! "अट्कुप्वाङि"ति सूत्रे रषाभ्यामिति पञ्चमीश्रुत्याऽव्यवहितांशोपस्थितौ व्यवहिताव्यवहितयोः परस्परविरोधात् सूत्रं व्यर्थम्। तत्सामर्थ्यात् रषाभ्यां परस्याडादिव्यतिरिक्तव्यवधानशून्यस्य नस्य णत्वमित्यर्थेनादोषात्। तदुक्तं भाष्ये णत्वेऽन्यव्यवायेप्रतिषेधो वक्तव्योनवाऽन्येनव्यवेतत्वादिति। एतदुत्तरं अटाव्यवायसत्त्वात्प्राप्नोत्येवाटैवव्यवायेइत्यर्थादित्यादि भाष्यमेकदेशिनोरुक्तिप्रत्युक्तिपरम्। "चुट्टुतुलशर्व्यवायेने"तिप्रतियोगिज्ञानसापेक्षनिषेधबोधकगुरुन्यासेन सिद्धे "अट्कुप्वाङि"त्युक्त्या एतैरेव व्यवायेइत्यर्थं वदता तस्याः तदुक्तित्वध्वननात्। इदं वार्तिकमतम्। भाष्ये तु व्यवाये इत्येको योगः, अट्कुप्वाङ्नुमित्यपरो योगः। पूर्वेणैव सिद्धौ द्वितीययोगो व्यर्थीभूयाऽऽक्षरसमाम्नायिकै र्व्यवाये यदि णत्वं तर्हि तैरेवेति ज्ञापयति। तेन मातृणामित्यत्र व्यवाये इति योगेन णत्वसिद्धया ऋवर्णान्नस्येति वार्तिकं न कर्त्तव्यं भवतीति लाघवम्। एवञ्चादर्शेन इत्यत्र न णत्वम् वस्तुतस्तु–अडाद्यतिरिक्तयत्किञ्चिद्वर्णकर्तृकव्यवधानशून्यस्य नस्य णत्वमिति वर्णांशे संकोच इति नागेशमतमयुक्तम्। देवदत्त यज्ञदत्तौ गच्छत इत्यत्रोभयनिष्ठव्यापारस्यभिन्नत्वेऽपि निवृत्तभेदप्रतीतिवत् अड्व्यवधानस्यतदतिरिक्तव्यवधानस्य चैक्यात् दोषस्तदवस्थ एव, तस्मादेकदेशिमतमेव युक्तम्।

११—नामि।

नन्वामीत्येव सूत्रमस्तु राम + आमित्यवस्थायां नित्यत्वात्पूर्वंदीर्घेऽपि ह्रस्वन्तानुड्विधानसामर्थ्याद्भूतपूर्वह्रस्वान्तत्वमादाय नुट्सिद्धेः। नच (नृच) इतिविकल्पात्, नृणामित्यत्र नुडर्थं ह्रस्वग्रहणस्य चारितार्थ्यात् कथं ज्ञापकत्वमिति वाच्यम्। नृनद्याप इति न्यासकरणेनैव तत्सिद्धेः। तदुक्तं भाष्ये नैकमुदाहरणं योगारम्भंप्रयोजयति। न च तिसृणामित्यत्र "नतिसृ" इति दीर्घनिषेधात् ह्रस्वग्रहणस्य सावकाशत्वमिति वाच्यम्। षट्चतुर्भ्यश्चेत्यत्र त्रेरित्यनुवृत्त्या तत्सिद्धेः। नच षट्चतुर्भ्यश्चेत्यत्र बहुवचननिर्देशात् गौणे नुटोऽप्रवृत्तौ प्रियचतसृणामित्यत्र नुडर्थं ह्रस्व-

ग्रहणमिति वाच्यम् । लाघवानुरोधेन तत्र सूत्रे बहुवचननिर्देशेऽपि गौणेऽस्याऽप्रवृत्तौ मानाभावात् । नैकमुदाहरणमिति भाष्यविरोधापत्तेश्च । नचाङ्गाधिकारे पञ्चम्या यदुच्यते गृह्यमाणविभक्तेस्तद्भवतीतिभाष्यात्षट्चतुर्भ्यो विहितस्यामो नुडित्यर्थे गौणेऽप्रवृत्तिः । परमपञ्चेत्यादौ तु समासस्य षट्प्रधानत्वेन समुदाये षट्त्वसत्त्वान्न दोष इति वाच्यम् । ह्रस्वग्रहणज्ञापकपरभाष्यप्रामाण्यात् नुड्विधायके विहितपदानध्याहारेण षडादिभ्यः परस्याङ्गसंज्ञानिमित्तस्यामो नुडित्यर्थेन गौणेऽपि तत्प्रवृत्तेः । अदड्डतरादिभ्यः षड्भ्योलुक्, इतिसूत्रद्वये विहितविशेषणमेव, लक्ष्यानुरोधात् । नचैवं पदांदतामित्यादौ भूतपूर्वह्रस्वान्तत्वमादाय नुडागमापत्तिरिति वाच्यम् । ह्रस्वत्वंनाम मात्राकालिकाच्त्वम् । तत्र मात्राकालिकांशे भूतपूर्वगत्याश्रयणेऽप्यच्त्वांशे तदाश्रयणाभावात् । एवञ्च नकारोच्चारणं व्यर्थमेवेति चेन्न, चर्मणामित्यादौ दीर्घाभावाय "नोपधाया"इति सूत्रेऽनुवृत्त्यर्थं नकारोच्चारणस्याऽऽवश्यकत्वादिति दिक् ।

१२—अनेकाल्त्वात्सर्वादेशः ।

ननु सर्वे इत्यत्र नानुबन्धकृतमनेकाल्त्वमिति निषेधात् शित्त्वात्सर्वादेश इत्येव कथनं युक्तमिति चेन्न, सर्वादेशतायाः प्राक् प्रत्ययत्वज्ञानाभावेनेत्संज्ञाया अप्रवृत्तेरिति प्राचीनमतम् । परे तु इत्संज्ञायोग्यत्वमनुबन्धत्वमिति सिद्धान्तात् नानुबन्धकृतमिति निषेधप्रवृत्त्या शित्त्वादेव सर्वादेशः । अनेकाल्शिदिति सूत्रे इत्संज्ञायोग्यशकारवत्त्वमेव शित्त्वम् । अतएव कार्यविषये नानुबन्धकृतमसारूप्यमिति विकल्पाभावः सिद्ध्यतीति दिक् ।

१३—उभशब्दोनित्यंद्विवचनान्तः ।

ननु द्वित्वविशिष्टवाचकोभशब्दस्य सर्वादिगणे पाठो व्यर्थः । सर्वनामप्रयुक्तकार्याणां द्विवचनेऽभावात् । नचाकजर्थं तस्य पाठ इति वाच्यम् । कप्रत्ययेनैवेष्टसिद्धेः । नापिस्वरे विशेषः, प्रत्ययस्वरचित्स्वराभ्यामन्तोदात्तत्वस्यैव सत्त्वात् । नच सुबन्तात्तद्धितोत्पत्त्या चित्त्वप्रयुक्तमन्तोदात्तत्वमुभकाभ्यामित्यादौ सुबन्तस्य भवति, कप्रत्यये तु प्रकृतेरिति विशेष इति वाच्यम् । तद्धितविधौ प्रातिपदिकाधिकारात् प्रातिपदिकस्यैव प्रकृतित्वात् । नचाकचि कृते तन्मध्यपतितन्यायेनोभकशब्दस्योभग्रहणेन ग्रहणात्, उभकाववयवौ यस्येत्यर्थेउभकशब्दादयचि उभकयइति रूपम् । कप्रत्यये तु नेति विशेष इतिवाच्यम् । कश्चेदानीं काकचो विशेष इति भाष्यप्रामाण्येनैषामनभिधानादिति

चेन्न, उभादुदात्तो नित्यमिति सूत्रे उभादुदात्त इत्येको योगः, उभशब्दादवयविन्यर्थेऽयजित्यर्थः। ततो नित्यमित्यपरोयोगः। उभशब्दाद्वृत्तिविषयेऽत्यन्तस्वार्थिकायजित्यर्थः। अयञ्च वृत्तिविषये सुबुत्पत्तेः पूर्वमेव। स्वार्थिकत्वेनान्तरङ्गत्वात्। अतएवायज्विशिष्टस्योभस्य सर्वनामत्वात् सर्वनामप्रकृतिकसप्तम्यन्तत्वेन उभयत्रेत्यादौ त्रलाद्युत्पत्तिः। द्वितीययोगे नित्यशब्दस्य वाच्यार्थविरोधान्न महाविभाषासम्बन्धः। उभयोऽन्यत्रेतिवार्तिकप्रामाण्यात् यत्रोभशब्दस्योभयशब्दस्य वा द्विवचनविषयत्वाभावसम्भावना तत्रैवायच्। अतएव उभयोर्वास इत्यादौ नायच्। अकचि कृते तन्मध्यपतितन्यायेन द्विवचनपरत्वादुभकावित्यत्रायज् न भवति। प्रत्ययस्य तु तेनैव व्यवधानादयजापत्तिः। तदर्थं सर्वादिगणे पाठस्यावश्यकत्वात्। लिट्यभ्यासस्योभयेषामितिनिर्देशेन योगविभागस्येष्टसिद्ध्यर्थत्वेन च द्वितीययोगस्य क्वचिदप्रवृत्तेः। अतएव रूपाद्यन्ते नायच्। नचैवं यद्युभशब्दादयच् स्यादयजन्तस्योभशब्दस्य सर्वादौ पाठात् सर्वनामत्वादकचि, उभशब्दस्य द्विवचनपरत्वमेवेति ततोऽन्यत्रेति न जातमित्ययचोऽसाधुत्वात् केऽप्युभकाविति रूपासिद्धे गणे पुनरपि पाठो व्यर्थ इति वाच्यम्। अकच बाधित्वा उपजीव्यत्वेन कस्यैव प्राप्तेः। ननु नह्येकमुदाहरणमिति न्यायादव्यय सर्वनाम्नेत्यत्रैवोभशब्दपाठेनेष्टसिद्धेसंज्ञाप्रणयनं व्यर्थम्, सर्वनामसाहचर्यादभिव्यक्तपदार्था ये इति न्यायाच्च संज्ञोपसर्जनयो र्व्यावृत्तेः। भाष्ये तु "उभयोऽन्यत्रे"ति वार्त्तिके द्वित्वसंख्याप्रकारकसंख्येयविशेष्यकबोधविषयार्थानुवादकत्वरूपद्विवचनस्यापि ग्रहणात् कप्रत्ययस्याज्ञातादिविशिष्टस्वार्थे विधानेन तस्यापि द्विवचनशब्देन ग्रहणादयजोऽप्राप्तौ गणे उभयशब्दपाठः प्रत्याख्यातः। अतएवोभयोरुभौ उभोभौ इत्यादौ नायच्। तदुक्तं भाष्ये केऽप्यन्तरेण वचने द्विवचनपरो भविष्यति। कथं स्वार्थिकाः प्रत्ययाः प्रकृतितोऽविशिष्टा भवन्तीति प्रकृतिग्रहणेन स्वार्थिकानामपि ग्रहणात्। त्रतसिलौ तु विभक्त्यन्तरस्य स्वार्थे विहितौ इति तत्तत्कारकशक्तिप्रधानावेवेति। त्रतसिलोरुक्तद्विवचनत्वाभावादुभयत उभयत्रेत्यादौ न दोष इति दिक्।

१४—उभये।

उभयशब्दाज्जसि स्थानिवद्भावेन तयबन्तत्वात् प्रथमचरम इति वैकल्पिक सर्वनामसंज्ञाप्राप्ता। विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वान्नित्यैव संज्ञा भवति। नच

नित्यसंज्ञायां सर्वार्थबोधकत्वरूपार्थस्यापेक्षणात् कथं नित्यसंज्ञेति वाच्यम्, वैकल्पिकसंज्ञायामपि तस्यापेक्षणाच्चेति प्राचांमतम्। परेतु प्रथमचरमेति विकल्पस्य पक्षेऽभावबोधकतया निषेधाश्चबलीयांस इत्यनेन 'उभये' इत्यादौ वैकल्पिक-संज्ञाया एव प्राप्तिः। किञ्चान्तरङ्गं बलीय इति परिभाषाया नात्र विषयः, युगपत् प्राप्त्यभावात्। संज्ञायां बाध्यबाधकभावाभावेन प्रातिपदिकसंज्ञा-समकालमेव सर्वनामसंज्ञाप्रवृत्तेश्च। अतएव 'उभये' इत्यत्र सर्वनाम्नो विहितत्वेन जसःशीभावसिद्धिः। पूर्वपरेत्यादिपक्षे तदभावमात्रबोधकम्। नाप्यसिद्धं बहिरङ्ग मन्तरंगे इत्यस्याः परिभाषायाः प्राप्तिः। अन्तरङ्गोत्तरं बहिरङ्गप्राप्तेः। नच जसीति विषयसप्तमी, पक्षेऽन्तरङ्गबहिरङ्गयो र्युगपत्प्राप्त्याऽन्तरङ्गं बलीय इति-परिभाषाया विषयोऽस्त्येवेति वाच्यम्, प्रातिपदिकसंज्ञोत्तरमेव शीभावविषयसत्त्वेन तदुत्तरमेव वैकल्पिकसर्वनामसंज्ञा, नित्यसंज्ञा तु प्रातिपदिकसमकालमेवेति युगपत्प्राप्तिविरहात्, स्थानिवदिति प्रापिताया वैकल्पिकसंज्ञाया निरव-काशत्वाच्च। प्रत्यक्षस्य स्थानिवद्भावस्याऽऽनुमानिक्या बहिरङ्गपरिभाषया बाधायोगाच्च सर्वनामसंज्ञायां यथोद्देशपक्षस्यैवौचित्याच्च। अतएव तयादेशे उभयप्रतिषेधः। 'तयपो ग्रहणेन ग्रहणाज्जसि विभाषा प्राप्नोती'ति स्थानिवत् सूत्रस्थवार्तिकं संगच्छते। अयच् प्रत्ययान्तरमितिसूत्राशयप्रदर्शनेन भाष्ये प्रत्या-ख्यातं, नत्वन्तरङ्गन्यायबलेन। सूत्रेतयब्ग्रहणं तु पृथक्कृत्यानुवादः। नचायचः प्रत्ययान्तरत्वे द्वयेद्वया इति रूपासिद्धिरितिवाच्यम्। द्वित्रिशब्दप्रकृतिकायजन्तस्य जसःशीविषयेऽनभिधानस्वीकारात्। पुंस्येवत्राऽनभिधानमिति तदाशय इति दिक्।

१५—इनादीन्बाधित्वा परत्वाज्जरस्।

निर्जरशब्दात् टाविभक्तौ जरसादेशविभक्त्यादेशयोः प्राप्तयोः परत्वात् जरसि निर्जरसेतिरूपम्। जरसादेशाभावपक्षे निर्जरेणेति प्राचां मतम्। परेतु 'विभक्त्यादेशेभ्यः परत्वाजरस्' इति प्राचीनोक्तं न युक्तम्। अजरांसीत्यत्र नुम्-जरसोः प्राप्तयो र्विप्रतिषेधेन जरसिति भाष्योक्त्या प्रकृत्यादेशविभक्त्यादेशयो र्मध्ये विभक्त्यादेशस्यैवेष्टत्वात्। अन्यथा शीभावात्पूर्वमेव जरसः प्रवृत्तौ तदा सर्वनामस्थानत्वाभावान्नुमा सह विप्रतिषेधविचारासंगतिः स्पष्टैव। अतएव टाङसीति सूत्रे भाष्यकारः सन्निपातपरिभाषया जरसादेशमनभ्युपयन्नतिजरेणाति-जरादिति भाष्यं नत्वतिजरसिन अतिजरसादितिगौरवमुद्भावितवानितिकैयटेनोक्तम्।

वृत्तिकारोऽप्याहाऽतिजरसिन अतिजरसादिति केचिदिच्छन्ति, यथा तु भाष्यं तथा नैतदिष्यते इति लक्ष्यते, नपुंसकद्वितीयैकवचनेऽपि लुकं बाधित्वाऽतोऽमित्यनेनामि कृते सन्निपातपरिभाषया जरसादेशो न। तत्र पूर्वपक्षिणा अतिजरसं पश्येत्यत्रलुक् कुतो नेति पृष्टे, परेण प्रथमैकवचनेऽतिजरसं तिष्ठतीत्यत्रापि लुक् कुतो न शंक्यते इति पृष्टे, पूर्वपक्षिणा प्रथमैकवचनेऽम्भावोत्तरमेव जरस्, तत्र जरसि कृते सन्निपात-परिभाषया न लुक् यद्वाऽम्भावे कृते सन्निपातपरिभाषया न जरस् इति विशेष उक्तः। ततः परेण यद्येवमतिजरसमतिजरसैरित्यत्र न प्राप्नोति जरस् इति द्वितीयैक-वचनादौ शंकिते सिद्धान्तिना इष्टमेवैतत् अतिजरमतिजरैरिति भवितव्यम्। तत्रा-न्त्यपाठ एव युक्तः। अन्यथा प्रथमैकवचने सन्निपातपरिभाषया लुकोऽभावे द्वितीयैकवचनेऽपि तया परिभाषयैव लुकोऽप्राप्तौ विशेषोक्तिरसंगतैव स्यात्। एवं जरसादेशे कृते याडादिवारणाय तत्तत्सूत्रे आकारप्रश्लेषस्तेषां परत्वात्। परे तु जरसादेशात् विभक्तिसम्बन्धिकार्यमात्रं पूर्वविप्रतिषेधेन भवति। तेन जराणामित्यादावपि पूर्वं नुटि जरसोऽभाव एव। एवञ्च "ह्रस्वनद्याप" इत्यत्र आकारप्रश्लेषो विफलः। अतएव ङ्याब्ग्रहणेऽदीर्घइतिवत् जरसादेशस्य स्थानिवत्त्वप्रतिषेधो वार्तिककृता नारब्ध इति दिक्।

१६—धातोः किं ? हाहान्।

आतो धातोरिति सूत्रे धातुग्रहणाभावे हाहानित्यादौ आलोपापत्तिः। अस्य क्रियावाचकत्वस्वीकारे तु सानिति प्रत्युदाहरणं बोध्यम्। परे तु क्त्वः श्नः इत्यादिप्रयोगसिद्धयर्थं वार्तिककारेणाऽऽतोऽनाप इति वचनं कृतम्। भाष्ये आतोधातोरिति सूत्रे आदिति योगं विभज्य तत्प्रत्याख्यातम्। तथाचोक्तप्रयोगे लोप इष्ट एव। नचैवं रमाशब्दादाचारक्विपि, सूत्रमते लोपो भवति वार्तिकमते लोपो नेति सूत्रवार्तिकयो विरोध इति वाच्यम्। आबन्तादनभिधानेनाऽऽचार क्विपोऽभावात्। तत् क्विबन्ताद्वा कर्तृक्विपोऽभावाच्च। आतोधातोरिति सूत्रे धातुग्रहणमाबन्तनिवृत्त्यर्थमेव। अतएव प्रथमयोरिति सूत्रभाष्ये बाध्यसामान्य-चिन्तापक्षे पररूपं दीर्घमात्रस्यबाधकमितिपक्षे रामानित्यादावपि पररूपापत्तिः, तद्व्यावृत्त्यर्थं बहुवचने झल्येदिति सूत्रे बहुवचने इति योगं विभज्याऽतोदीर्घ इति, सुपिचेति चानुवर्त्य बहुवचने सुपि परेऽतोऽङ्गस्यदीर्घः स्यादित्यर्थेन पररूपबाधकं दीर्घं विधाय रामाणामित्यादौ बहुवचनेइतियोगेन परत्वाद्दीर्घे

कृते नुड् न स्यात्, नुड्विधानस्याग्नीनामित्यादौ चारितार्थ्यादित्याशंक्य ह्रस्वनद्याप इतिसूत्रे "आजसेरसुक्" इत्यतः आद्ग्रहणानुवृत्त्या समाधानं कृतम्। सूत्रे आद्ग्रहणानुवृत्तौ कीलालपामित्यादावपि नुडापत्तिमाशंक्य आतोधातोरित्यनुवर्त्य नुड्बाधकलोपेन समाहितम्। ह्रस्वनद्यापो नुडिति सूत्रे आद्ग्रहणानुवृत्तिस्वीकारे आब्ग्रहणं न कार्यम्। अधात्ववयवाकारान्तानां लोपाभावे तु अव्युत्पन्नहाहा-मित्यादौ नुट्प्रसंगस्यवारयितुमशक्यत्वात्भाष्यासंगतिः। नचाधात्ववयवाका-रान्तानां लोपस्वीकारे एकादेशानपह्नतटापोऽसम्भवादिति वचनविरोधः, क्त्वाश्ना प्रत्यादौ तादृशाकारदर्शनादिति वाच्यम्। स्त्रीत्वबाधकप्रत्ययान्ततदादिघटका-कारभिन्नाकारपरं धातुपदमिति स्वीकारेणादोषादिति दिक्।

१७—कोशे शब्दा अर्थपरा एव।

"पद्दन्नो" इति सूत्रे प्रभृतिग्रहणंप्रकारार्थम्। प्रकारः सादृश्यम्, तच्च सुप्त्वेन गृह्यते। तेन पदंघ्रिश्चरणोऽस्त्रियाम्, स्वान्तं हृन्मानसं मनः इत्यादि सिद्धम्। न च कोशस्थपादादीनां पदाद्यादेशत्वे पदादिभ्यःपृथक्पादादिवचनं तत्र व्यर्थम्। स्थान्युपादानेनैव तदर्थाभिधानसमर्थादेशस्याऽप्यर्थबोधनसम्भवात्। अतएव नसाद्यादेशानां कोशेऽनुपन्यास इति वाच्यम्। भाष्यरीत्या पदादीनामनादेशत्वात्। तदुक्तम् पादशब्दसमानार्थकः पदशब्दोऽप्यस्ति। अनादेशत्वेन भिन्नत्वेऽपि तृज्वत्क्रोष्टुरितिवत् शसादिषु उभयोः प्रयोगः, सर्वनामस्थाने पादादीनामेव प्रयोग इति व्यवस्थार्थमस्यसूत्रस्याऽऽवश्यकत्वेन सौवरतो हृदादीनां प्रयोगार्थं प्रकारार्थंत्व स्याऽऽवश्यकत्वात्। ननु स्वान्तं हृन्मानसं मनः, पदङ्घ्रिश्चरणोऽस्त्रियामिति कोशे हृत्पच्छब्दयोः शब्दस्वरूपपरतया स्वरूपतो हृदयत्वप्रकारकहृदयविशेष्यकबोध तात्पर्येणोच्चरितहृदयशब्दस्य, एवं स्वरूपतश्चरणत्वप्रकारकचरणविशेष्यक बोध तात्पर्येणोच्चरित पादशब्दस्य हृत् पदादेश विधानेन प्रकृते हृत्पदादेशयोरप्राप्त्या तेन पदंघ्रिश्चरणोऽस्त्रियाम्, स्वान्तं हृन्मानसं मन इति संगच्छते इति कौमुदी-ग्रन्थासंगतिरत आह—कोशे शब्दा अर्थपरा एव। शक्तिग्रहस्तु "इदं विष्णुपदं नारायणत्वावच्छिन्नार्थनिरूपितशक्तिमत्, नारायणपदघटितप्रघट्टकघटकत्वादित्यनु-मानेन सामान्यत एव। विष्णुर्नारायण इत्यादौ विष्णुपदार्थाभिन्नो नारायणपदार्थः इति क्रमेण बोधः। एतत्पदममुकवाचकमिति शक्तिग्रहस्तु स्वस्वप्रसिद्धिमादाय तत्तत्पुरुषस्यानियतः पश्चान्मनसैव भवति। अघ्न्ये देवि सरस्वतीत्यादौ यत

एतानि तव नामान्यतस्त्वदभिन्ना एषामर्था इति बोधः। अतएव नामंत्रिते इति सूत्रे सामान्यवचनमित्यस्येदं प्रत्युदाहरणं दत्तम्। अत्रैकशेषस्तु न, तच्छब्दस्वरूपस्य स्पष्टबोधानापत्तेः। अनेकशब्दानां स्वरूपबोधनपूर्वकमर्थबोधने कोशतात्पर्यात्। अतएव यत्तदेतेभ्य इत्यादौ पाणिनिनैकशेषो न कृतः। एतेन कोशे शब्दानां शब्दपरत्वमेव। अतएवैकशेषो न। अर्थपरत्वं तु न सम्भवति। इतः पूर्वं शक्तिग्रहाभावात्। एते शब्दा एकार्था इति बोधः। एवञ्च प्रभृतिग्रहणस्य प्रकारार्थत्वाभावेऽपि न क्षतिरित्यपास्तमिति दिक्।

१८—शेषो घ्यसखि।

सखिभिन्नावयवौ ह्रस्वाविवर्णोवर्णौ घिसंज्ञौ भवत इति वर्णसंज्ञापक्षेऽर्थः। नच सखिभिन्नं 'खि' इति तदवयवेकारस्य घिसंज्ञादुर्वारेति वाच्यम्। पर्युदासन्यासेनसखिभिन्नं यत्प्रातिपदिकं तदवयवह्रस्वेकारोकारयोर्घिसंज्ञाभवतीत्यर्थस्वीकारात्। तेन कृतं सख्या इत्यत्र न घिसंज्ञा। सुखखिनेत्यत्र समुदायस्य सखिभिन्नत्वाद्भवत्येव घिसंज्ञा। सिद्धान्तिमते तदन्तसंज्ञापक्षे सखिभिन्नप्रातिपदिकावयवौ ह्रस्वौ याविदुतौ तदन्तयोर्घिसंज्ञेत्यर्थः। पक्षेऽस्मिन् समुदायस्य सखिभिन्नत्वात्घिसंज्ञाभवत्येवेतिहरदत्तादिमतम्। परेतु यथात्वसन्तस्येति सूत्रेऽधातोरित्येतद्घटकधातुपदस्य धात्ववयवे लक्षणा। धात्ववयवभिन्नो योऽस् तदन्तस्य दीर्घो भवतीत्यर्थकरणेन पिण्डग्रः इत्यत्र असोधात्ववयवत्वात् दीर्घो न भवति तथा असखीत्येतद्घटकसखीत्यस्य सख्यवयवे लक्षणया सख्यवयवभिन्नयोरिदुतो घिसंज्ञा भवतीत्यर्थेऽसखीति निषेधात् सुसख्या इत्येव स्यान्नतु सुसखिनेति। तदन्तसंज्ञापक्षे "उतश्च प्रत्ययादि" त्यत्रेवाऽसखीतिप्त्रोरेव विशेषणम्। ततस्तदन्तविधिः। एवञ्च सख्यवयवभिन्नेवर्णोवर्णान्तयोर्घिसंज्ञाभवतीत्यर्थः। शेषपदार्थस्य विशेष्यतया तदन्तविधिः। अस्मिन् पक्षेऽपि प्रकृते नैव घिसंज्ञा यस्येतिचेति सूत्रे भाष्येऽपि इवर्णस्य ईति किमुदाहरणम्। अतिसखेरागच्छति। यद्यत्र लोपो न स्यात्तर्हि सवर्णदीर्घे कृते पूर्वान्तवद्भावेन सखिशब्दत्वादतिदेशविषये लक्षणप्रतिपदोक्तपरिभाषया अप्रवृत्त्योपसर्जनह्रस्वत्वे कृतेऽपि घिसंज्ञा न स्यात्। लोपे तु लक्षणप्रतिपदोक्तपरिभाषया न दोषः। प्राचीनरीत्या लोपाभावेऽपि समुदायस्य सखिभिन्नत्वाद्घिसंज्ञास्यादितिभाष्यासंगतिःस्पष्टैव। नच लोपेऽपि लिङ्गविशिष्टपरिभाषया दोष इति वाच्यम्। सखिशब्दस्य तदवयवपरत्वेन प्रातिपदिकग्रहणाभावात्। नच ख्यत्यादितिसूत्रे भाष्येऽपि किमर्थं विकृतनिर्देशः? न सखिपति-

भ्यामित्येवोच्येत, अतिसखेरित्यत्र माभूदितिभाष्यासंगतिः। तथाहि नात्र बहुव्रीहिः, कप्प्रसंगात्। नाप्यतिशयःसखेति विग्रहोऽसखीतिनिषेधेन घिसंज्ञानुपपत्तेः। सखायमतिक्रान्तइति विग्रहे तु टजापत्तिस्तस्मात् घिसंज्ञासिद्ध्यर्थं ङ्यन्तप्रकृतिकसखि-शब्दोऽङ्गीकर्त्तव्यः। न तत्र सखिपतिभ्यामित्यस्यप्राप्ति र्लाक्षणिकत्वादिति वाच्यम्। विहितविशेषणानाश्रयणेनैव प्रतिपदोक्तपरिभाषानाश्रयणेनैवास्य भाष्यस्य प्रवृत्तत्वात्। **वस्तुतस्तु** तस्मादित्युत्तरस्येतिपरिभाषाया जागरूकत्वाद्, विहितविशेषणाश्रयणे बहुपत्युग्त्यादौ दोषाच्च विहितविशेषणाश्रयणेऽपि प्रतिपदोक्तपरिभाषाया अनाश्रयणे प्रमाणाभावात् भाष्यासंगतिस्तस्मात् प्राचीनोक्तमेव युक्तम्। यस्येतिचेतिसूत्रस्थभाष्य-मेकदेश्युक्तिरितिदिक्।

१९—पतिः समास एव।

ननु शेषोध्यसखीत्यनेनैवघिसंज्ञासिद्धौ सूत्रमिदं नियमार्थम्। पतिशब्दस्य यदि घिसंज्ञा स्यात्तर्हिसमासे एवेतिनियमादेवकारे लब्धे सूत्रे एव पदोपादानं विफलमिति चेन्न! समासे यदि संज्ञा स्यात्तदा पतिघटितस्यैवेतिविपरीतनियम-वारणाय तस्याऽऽवश्यकत्वात्। पतये नमः सखिनेत्यादिव्याकरणानिष्पाद्यत्वेना-साधुरेव। नचैवं स्मृतिपुराणादिषु कथं तत्प्रयोग इति वाच्यम्। तपोमाहात्म्येना-साधुप्रयोगेऽपि ऋषीणांदोषाभावात्। याज्ञेकर्मण्येवाऽसाधुप्रयोगे दोषाच्च। अस्माकमपि स्मृतिपुराणाध्ययनविधिबलात् तेषां तपोबलाच्च यज्ञमध्येऽपि तत्पाठे दोषाऽभावः। स्वातन्त्र्येण ईदृशानां प्रयोगे प्रत्यवायोभवत्येव। तदुक्तं भाष्ये छन्दोवत्कवयः कुर्वन्तीत्युक्त्वा नह्येषेष्टिरस्ति। बहुच्पूर्वस्य पतिशब्दस्य न घिसंज्ञा, समासइत्युक्तेः। अतएव पतिवृत्तौ एवेति न सूत्रितम्। वर्णसंज्ञापक्षे पत्यवयवेकार इत्यर्थः। तदन्तसंज्ञापक्षे पत्यवयवेकारान्तेति। एतेन (शेषोध्यसखिपती) पतिसखीसमासएवेति वा सूत्र्यतामिति केषाञ्चिदुक्तिरपि परास्ता। सुपतिना सुसख्येतिरूपासिद्धेरिति दिक्

२०—बहुगणवतुडति संख्या।

ननु संख्यासंज्ञाकरणज्ञानरूपप्रकरणसत्त्वात् कृत्रिमाकृत्रिमन्यायेन संख्याप्रदेशेषु कृत्रिमायाः संख्याया एव ग्रहणमिति चेन्न! संख्याया अतिशदन्तायाः कन्, इति सूत्रे शदन्तपर्युदासेन व्याकरणे उभयगतेराश्रयणात्। किञ्च लोकप्रसिद्ध-

महासंज्ञाकरणेन प्रदेशेषु लोकप्रसिद्धार्थस्याप्यवगतिः। नचैवं बहुगणयोरपि संख्यात्वात् संख्यापदेन ग्रहणं भविष्यत्येवेति सूत्रे तद्ग्रहणं व्यर्थमिति वाच्यम्। नियतविषयपरिच्छेदहेतुत्वाभावेन तयोः संख्यात्वाभावात्। बहुत्वादि हि त्र्यादि-संख्याव्यापको धर्मविशेषः। अतएव एतत् सूत्रमतिदेशार्थम्। यदयमसंख्यां संख्येत्याहेत्युक्तं भाष्ये। एकादिकया चापि संख्यायते इति भाष्यस्य बह्वादिकयापि स्वव्याप्यत्रित्वादिसंख्यया संख्यायते इत्यर्थः। यद्वा चापिशब्दौ वाक्यालङ्कारे। एकादिकया संख्यायते सापि प्रदेशेषु यथा गृह्यते इति लोकप्रसिद्धमहासंज्ञाकरणादि-त्यर्थः। एवञ्चार्थान्तरवाचित्वेसति बहुत्ववाचिनश्चेत्संख्याकार्यं तर्हि बहुगणयोरेवेति नियमार्थं सूत्रे बहुगणग्रहणम्। तेन भूर्यादीनां न संख्यासंज्ञा। तेषां वैपुल्याद्यर्था-न्तरवाचित्वात्। यद्वा अनियतसंख्यावाचिनां चेत् बहुगणयोरेवेतिनियमइत्युक्तिरपि-परास्ता। वस्तुतस्तु संख्यात्वव्याप्यधर्मावच्छिन्नवाचकत्वमेव संख्यावाचकत्वम्। अतएव एकादिकया चापि संख्यायते इति भाष्ये चापिशब्दौ सङ्गच्छेते। नच यदयमसंख्यां संख्येत्याह इति भाष्यविरोध इति वाच्यम्। तद्भाष्यस्य वत्वन्तडतिप्रत्ययान्तविषयकत्वेनाऽदोषात्। भूर्यादीनां तु नियमेनैव वारणं बोध्यमिति। एवञ्च प्राचीनोक्तं समीचीनमेवेति दिक्।

२१—प्रत्ययलोपे प्रत्ययलक्षणम्।

ननु प्रत्ययस्य लुगित्यतः प्रत्ययग्रहणानुवृत्त्यैव सिद्धे प्रत्ययलोप इति सूत्रे आद्यप्रत्ययग्रहणेनावयवलोपे प्रत्ययलक्षणं माभूदिति ज्ञापनादाघ्नीयेत्यत्रानुनासिकलोपो न। नच सीयुटः सकारमात्रस्य प्रत्ययग्रहणेनाग्रहणाल्लोपाप्राप्तौ व्यर्थमेव प्रत्यय-ग्रहणमिति वाच्यम्। प्रत्ययावयवेऽपि प्रत्ययत्वव्यवहारो भवतीति ज्ञापनात्। अतएव आदेशप्रत्यययोरिदुदुपधस्येत्यादौ न दोषः। सात्पदाद्योरिति च चरितार्थम्। ननु स्थानिवत्सूत्रेणैव लिङ्धुगित्यादौ पदत्वसिद्धे सूत्रमिदं नियमार्थम्। नचातृणेट् मित्रशीरित्यादावनल्विधाविति प्रतिषेधेन स्थानिवत्त्वाप्रवृत्तौ हलादित्वाभावादिमागमे-दादेशयोरप्रवृत्तिरिति वाच्यम्। तृणह इमिति सूत्रे हलित्यननुवर्त्य नाभ्यस्तस्याचीत्यतो ऽचिनेत्यनुवर्तने तथा च तृणह श्नमि कृते इमागमः स्यान्नत्वजादौ पितीत्यर्थकरणेना-दोषात्। एवं शासइदिति योगं विभज्य हलित्यकरणेन मित्रशीरित्यादावपिदादेशसिद्धेः। एवञ्च सूत्रं व्यर्थं सत् प्रत्ययलोपे प्रत्ययलक्षणमेव नतु स्थानिवद्भावः इत्यादेशपदार्थं प्रत्ययलोपातिरिक्तत्वेन संकोचयति। तेन सुदृषत्प्रासाद इत्यत्रात्वसंतस्येति दीर्घो

न । नचप्रत्ययलक्षणेनासन्तत्वाद्दीर्घापत्तिस्तदवस्थेति वाच्यम् । प्रत्ययलोपेइतिसूत्रे-स्थानिवदित्यनुवृत्त्यैव सिद्धे सूत्रे प्रत्ययलक्षणग्रहणेन प्रत्ययत्वव्याप्यधर्मावच्छिन्नो-द्देश्यताकेकार्येकर्त्तव्ये एव प्रत्ययलक्षणं यथा स्यादिति ज्ञापनात् । सुदृषत्प्रासाद इत्यत्राऽसन्तत्वस्यप्रत्ययाप्रत्ययसाधारणत्वेन दोषाभावः । नच "दाधर्ति दर्धर्ति" इति सूत्रे तेतिक्ते इति किं निपात्यते ? आत्मनेपदम् । नैतदस्ति । 'अनुदात्तङित्" इत्येव सिद्धम् । नियमार्थं तर्हि भविष्यत्यत्रैव यङ्लुगन्तस्य नान्यत्र । तेन बोभवीतीत्यत्र नात्मनेपदम् । अत्र ङित्वस्य प्रत्ययाप्रत्ययसाधारणत्वेन प्रत्ययलक्षणप्रवृत्तौ भाष्या-संगतिरिति वाच्यम् । आत्मनेपदमित्येवसिद्धान्तिनोक्तत्वात् । अनुदात्तङित इत्येव सिद्धमित्येकदेश्युक्तित्वेनादोषात् । नच "नखभिन्न" इत्यत्र प्रत्ययलक्षणेनैसा-पत्तिरिति वाच्यम् ? प्रत्ययलोपे प्रत्ययवदित्येव सिद्धे लक्षणग्रहणेन प्रत्ययत्वव्या-प्यधर्मावच्छिन्ननिमित्तताके कार्ये कर्त्तव्ये एव प्रत्ययलक्षणं यथा स्यादिति ज्ञापने-नादोषात् । वार्तिककृता अल्विध्यर्थमिदं सूत्रं मन्यते । अतएव अतृणेट्मित्रशी-रित्यादौ न दोषः । अत्रमतेऽपि प्रत्ययत्वव्याप्यधर्मावच्छिन्नेत्यादिप्रत्ययग्रहणेन ज्ञापनात् सुदृषदित्यादौ न दोषः । न च स्थानिवद्भावेनासन्तत्वाद् दीर्घापत्तिरिति वाच्यम् । अस्त्वादौ, "अनिनस्मिन्" इतिपरिभाषया वर्णत्वव्याप्यत्वातिदेशेनादोषात् ।

२२—अतिखट्वाय ।

जरसादेशस्यस्थानिवद्भावेनाऽऽबन्तत्वादेत्वैस्त्वशीनुट्याडाम्विधयः प्राप्नु-वन्ति । तद्वारणाय सम्बुद्धौ च, औङ् आपः, ह्रस्वनद्यापोनुट्, याडापः, ङेराम्-त्यादिषु सर्वत्राऽऽकारप्रश्लेषआवश्यकः । नचैवमतिखट्वायेत्यत्र श्रूयमाणमाकारं स्थानिवद्भावेनाऽप्त्वं चाश्रित्य याट् स्यात् । नच ङ्याब्ग्रहणेऽदीर्घ इत्यनेन स्थानिवद्भावप्रतिषेधादाप्त्वाभावादेव न याटः प्राप्तिरिति वाच्यम् । तत्तत्सूत्रेषु आकारप्रश्लेषमाश्रित्य ङ्याब्ग्रहणेऽदीर्घ इति प्रत्याख्यातृभाष्यनये शंकासत्त्वेनादो-षात् । अत्रयत्रोदाहरणेसूत्रभाष्यवार्तिकानांफलभेदः आपतति तेषामनभिधानं, यथा अतिखट्वस्य अः अतिखट्वा । वस्तुतस्तु दीर्घात् पूर्वं फलाभावेन स्थानिवत्त्वाप्रवृत्तौ न फलभेदः । तथा च प्रकृते याडापत्तिर्दुर्वारेति वाच्यम् । प्रत्ययग्रहणपरिभाषया तदादिपदोपस्थितौ आ ततदाद्यभिन्नंयदङ्गंततःपरस्ययाड्विधानेनाऽदोषात् । नच स्त्रीप्रत्यये तदादिविधिनिषेधात् कथंतादृशार्थ इति वाच्यम् ? स्त्रीप्रत्यये चानुपस-र्जनेनेति वचनस्यैव भाष्ये पाठात् । नचाङ्गविशेष्यकतदन्तविधावाबन्ततदाद्यन्तंयद-

ङ्गमित्यर्थे पूर्वोक्तापत्तिस्तदवस्थेति वाच्यम् । अङ्गस्य विशेषणत्वात् । श्रुताकारं स्मृतानुबन्धञ्चादायाऽऽप्त्वानुसन्धानान्नयाट् । तस्य लाक्षणिकत्वादितिप्राचां मतम् । परे तु (ओत्) सूत्रे वर्णग्रहणेऽपि प्रतिपदोक्तपरिभाषाप्रवृत्तिस्वीकारादतिखट्वायेत्यत्राऽऽकारस्य लाक्षणिकत्वान्न याट् । नच याडाप इति सूत्रस्य निशायै इत्यादौ चारितार्थ्यात् खट्वायै इत्यत्र याट् न स्यादिति वाच्यम् । यस्य रूपस्य लक्षणप्रवृत्तिं विना न सम्भवस्तस्यैव लाक्षणिकस्य प्रतिपदोक्तपरिभाषाविषयत्वेन तस्या अत्राप्रवृत्तेः । किञ्च "पदाङ्गाधिकारे" इति वार्तिकेनाङ्गस्य विशेष्यताया एवौचित्यबोधनादङ्गस्यविशेष्यत्वमिति प्राचीनोक्तं न युक्तम् । अतएवाऽऽबन्तान्तं यदङ्गमित्यर्थाभिप्रयेणाऽतिखट्वायेत्येतत्प्रयोगसिद्धयेऽतिखट्व ए इति दशायां ङ्याब्ग्रहणेऽदीर्घ इति वार्तिकं व्याख्यायाऽऽकारप्रश्लेषेणवार्तिकप्रत्याख्यानेऽतिखट्वायेत्यत्र याड्वारणायोपायान्तरं नोक्तं भाष्ये । किञ्चाङ्गस्यविशेषणत्वे वार्तिकस्य तत्प्रत्याख्यानायाऽऽकारप्रश्लेषस्य च वैयर्थ्यापत्तिः । किञ्चार्द्धखट्वायामित्यादौ याटोऽनुपपत्तिः । किञ्चाऽऽकारप्रश्लेषपक्षेऽपि दीर्घोत्तरं स्वाश्रयाकारत्वं स्थानिवद्भावेनाऽऽप्त्वमिति शङ्काप्ययुक्तैव । दीर्घात्पूर्वं स्थानिवत्त्वस्य फलाभावादप्रवृत्तौ स्थानिनि आप्त्वबुद्धेरभावात् तदादेशेदीर्घे स्थानिवत्त्वाप्रवृत्तेः । परम्परया कार्यमादाय न स्थानिवद्भावस्य प्रवृत्तिः, प्रमाणाभावात् । "याडाप" इतिसूत्रभाष्येऽप्यतिखट्वायेत्यत्र स्थानिवत्त्वेन प्राप्तस्य याटः प्रतिषेधो वक्तव्यो न वक्तव्योङ्याब्ग्रहणेऽदीर्घ इति स्थानिवत्त्वनिषेधात् । नच भूतपूर्वमाप्त्वमादाय याट्स्यादिति वाच्यम् । लाक्षणिकत्वात् । स्थानिवत्त्वे तु तत्सामर्थ्यान्नैतत्परिभाषाप्रवृत्तिरिति दिक् ।

२३—ङिति ह्रस्वश्च ।

ङितिह्रस्वश्चेति सूत्रे ङित्येको योगः । ह्रस्वश्चेत्यपरो योगः । तत्राद्ये 'यू' इति स्त्र्याख्याविति, अस्त्रीति, इयङुवङ्स्थानाविति, वेति चानुवर्तते । द्वितीये 'यू' इति वेति स्त्रीवाचकावित्येतन्मात्रार्थकं स्त्र्याख्याविति चानुवर्तते । ह्रस्वयोरप्राप्ते दीर्घयोस्तु नेयङुवङिति निषेधादप्राप्ते विभाषा । इष्वशनिप्रभृतीनामुभयलिङ्गानामप्राप्तिमाशङ्क्य ङितिह्रस्वश्चेत्यत्र नित्यस्त्रीलिङ्गावित्येवंविधो नियमो नाश्रीयते इति कैयटोक्तिस्तु ह्रस्वांशमात्रविषया । अतएव "यू स्त्र्याख्यौ" इति सूत्रे ङितीत्यस्य दीर्घांशे निषेधविकल्पकत्वमुक्तम् । तेन "कटप्रुवे ब्राह्मण्यै" इत्यत्र न दीसंज्ञा, लिङ्गान्तरविशिष्टार्थाभिधायकत्वेन नित्यस्त्रीत्वाभावात् । परेत्वत्रसूत्रे आख्याग्रहणहितस्यैवाम्

सम्बन्धादथवा शब्दाधिकारात् स्त्र्याख्याविल्यस्यस्त्रीवाचकावित्येतावन्मात्रार्थकत्वात्-कटप्रुवे इत्यत्र विकल्पेन नदीसंज्ञा भवति। तच्च स्त्रीत्वं ङिदादिताङ्गस्य विशेषणम्। अतएव प्रथमलिङ्गग्रहणञ्चेत्यस्यात्राप्रवृत्त्यन्वाख्यायके ह्रस्वौ चेयङुवङ्स्थानौ च प्रवृत्तौ स्त्रीवचनावेव नदीसंज्ञौ भवतो न तु पुंवाचकाविति वक्तव्यमिति वार्तिकेऽतिशकट्यै ब्राह्मण्यै, क्रमाभूत् ! अतिशकटये ब्राह्मणायेत्युक्तं भाष्ये । एवञ्चास्य सूत्रस्य निषेधविकल्पकत्वासंभवः, समुदायस्य केनाऽपि प्राप्त्यभावात् अवयवस्य प्राप्तावपि तस्यानेन विकल्पाभावात् ङिदादिता-ङ्गस्यैवानेनविकल्पविधानात् । अतएवात्र वाक्यद्वये विधिविकल्प एव दर्शितः। नि-त्यस्त्रीलिङ्गावित्येवंविधो नियमो नाश्रीयते इति कैयटोक्तिस्तु वाक्यद्वयपरा । उपक्रमे निषेधपरतया व्याख्यानं तु यूस्त्र्याख्यावित्यस्य नित्यस्त्रीत्वार्थकत्वमजानत एकदेशिन उक्तिः, यू इति ह्रस्वयोर्ग्रहणमिति पद्योपपादने उक्तिभूतमिति तन्नादरणीयम्। यत्तु दीर्घवाक्ये स्त्र्याख्याविति, इदुतोस्तदन्तस्यवाविशेषणं पुनरङ्गेन तदन्तविधिः। अङ्गस्य च केवलं स्त्रीत्वंविशेषणम् । एवं ह्रस्वघटितवाक्येऽपि स्त्रियामित्येतन्मात्रमुभ-योर्विशेषणमिति तच्चिन्त्यम् , भाष्यात्तादृशार्थालाभात् । नन्वेवमपि खरकुट्यै ब्राह्म-णायेत्यादौ कन्लुबन्तस्यत्रिलिङ्गत्वेऽपि प्रथमलिङ्गग्रहणात् नित्यनदीत्वं भाष्ये उक्तम्। एवं श्रीशब्दात् कनि लुपि श्रिये ब्राह्मणायेत्यादौ विकल्पापत्तिः, युक्तवद्-भावेनाङ्गस्य स्त्रियां विद्यमानत्वात् । अत्र सूत्रे नित्यस्त्रीत्वानिवेशाच्चेति वाच्यम्। सत्यभिधाने इष्टापत्तेः । श्रिये ब्राह्मणायेतिभाष्यप्रयोगस्तु क्वजन्तात्क्विपि बोध्यः। कैयटमते लुबन्ते श्रियैब्राह्मणायेत्यादौ विकल्पाभावापत्तिरिति दिक् ।

सूत्रकारमते—प्रवृत्तिनिमित्तविशिष्टत्वं नित्यस्त्रीत्वम् । वैशिष्टयञ्च—स्वि-शिष्टशक्तिविशिष्टत्वं, स्वावच्छिन्नमुख्यविशेष्यतानिरूपितस्त्रीत्वावच्छिन्नाभेदसम्बन्धा-वच्छिन्नप्रकारताकबोधजनकत्वप्रकारकतात्पर्यविशेष्यतापर्याप्त्यधिकरणत्वमेतदुभयसम्ब-न्धेन । प्रवृत्तिनिमित्तवैशिष्टयञ्च शक्तौ-स्वावच्छिन्नविशेष्यताप्रयोजकत्वं, स्वावच्छि-न्नविशेष्यतानिरूपितस्त्रीत्वनिष्ठप्रकारताप्रयोजकत्वं, स्वावच्छिन्नविशेष्यतानिरूपितस्त्रीत्वे-तरलिङ्गनिष्ठप्रकारताऽप्रयोजकत्वमेतत्त्रितयसम्बन्धेन । स्वपर्याप्त्यधिकरणत्वं, स्व-ज्ञानाधीनोपस्थितिप्रयोज्यशाब्दबोधजनकत्वप्रकारकतात्पर्यविशेष्यतापर्याप्त्यधिकरणत्व-मित्युभयसम्बन्धेन शक्तिवैशिष्ट्यञ्च बोध्यम् ।

२४—अद्ड्डतरादिभ्यः पञ्चभ्यः ।

डतरादिभ्य इति विरुद्धविभक्तिपञ्चम्यन्तत्वादङ्गस्येत्यनेनान्वयानर्हमितिडतरादिभ्यो विहितयोः स्वमोऽङ्गसंज्ञानिमित्तयोरदडादेशः स्यादित्यर्थः । अतएव परमकतरं कुलमित्यादावदडादेशो न । यत्त्वर्थद्वारकं विधानमाश्रयितव्यम् । तेन परमकतरदित्यत्रादडादेशः सिद्ध्यतीति कैयटेनोक्तं तन्न युक्तम् । तथाहि डतराद्यर्थगतसंख्याभिधायिनोरित्यर्थस्तु न सम्भवति, पञ्चम्यन्तात्तादृशार्थाप्रतीतेः । षष्ठ्यर्थे पञ्चमीति स्वीकारे विरुद्धविभक्तित्वादिति भाष्यासङ्गतिः । विधानस्य सर्वथानाश्रयणेनार्थद्वारकं विधानमिति तद्ग्रन्थासंगतिश्च । न च विहितविशेषणाश्रयणेऽतिकतरमित्यादौ डतरादेशव्यावृत्त्यर्थमुपसर्जनप्रतिषेधारम्भो व्यर्थः स्यादिति वाच्यम् । परमकतरदिति व्यावृत्तयेऽवश्याश्रयणीयविहितविशेषणेनैवाऽतिकरादिव्यावृत्तौ तत्प्रत्याख्याने एवभाष्यतात्पर्यात् । "त्यदादीनाम" इत्यत्र षष्ठ्यन्तत्वात्त्यदादीनामइत्यर्थद्वारकं विभक्तिविशेषणमिति दिक् ।

२५—ह्रस्वो नपुंसके प्रातिपदिकस्य ।

क्लीबवदर्थे वर्तमानस्याजन्तस्येत्येवसामर्थ्यात् प्रातिपदिकलाभे सूत्रे प्रातिपदिकस्येति सत्त्वप्रधानलाभार्थम् । तेन काण्डे इत्यादावन्तवद्भावेन प्रातिपदिकत्वेऽपि न ह्रस्वः । विभक्त्यर्थस्य संसर्गमर्यादया भानेऽपि प्रकृत्यर्थापेक्षया तस्य प्राधान्यात् । प्रथमाया अप्यन्याभिहितशक्तिरर्थ इति तत्रापि तत्संसर्गको बोध इति शक्तेः प्राधान्यम् । 'काण्डे तिष्ठत' इत्यादावाख्यातार्थकर्तुः कर्तृक्रियाभावेन क्रियायामन्वये तदभिन्नप्रथमार्थस्यापि तेनसम्बन्धेनान्वयात् प्रथमार्थस्य प्राधान्यम् ।

सत्त्वप्रधानत्वञ्च—यत्किञ्चित्प्रधानतानिरूपिताप्रधानत्वासमानाधिकरणलिङ्गान्वयितावच्छेदकरूपावच्छिन्नप्रधानताप्रयोजकत्वम् । नचैवं श्रीपपुत्रः इत्यादौह्रस्वो न स्याल्लिङ्गान्वयितावच्छेदकश्रीकर्मकपालनकर्तृत्वावच्छिन्नप्रधानतायां जन्यजनकभावसंसर्गनिष्ठप्रधानतानिरूपिताप्रधानतासामानाधिकरण्यस्य सत्त्वादिति वाच्यम् ।

यस्य ह्रस्वश्चिकीर्षितस्तत्पर्याप्तप्रयोजकतानिरूपितप्रयोज्यतावदुपस्थितीयप्रधानतानिरूपिताप्रधानत्वासमानाधिकरणलिङ्गान्वयितावच्छेदकरूपावच्छिन्नोपस्थितीयाप्रधानता, तादृशप्रधानताप्रयोजकत्वंसत्त्वप्रधानत्वमितिपरिष्कारेणादोषादिति दिक् ।

२६—दादेर्धातोर्घः ।

अत्र सूत्रे दादिपदस्यौपदेशिकदादित्त्ववति लक्षणा । अतएव उपदेशे दादेर्धा-

तो हस्य घः स्यादित्यर्थः सम्पद्यते । अतएव धुगित्यत्र पूर्वत्रैपादिकढत्वदृष्ट्या घत्वस्यासिद्धत्वाड्ढत्वं कुतोनेत्याशंक्यापवादत्वेन समाधायाऽथवैवं वक्ष्यामि होढोऽदादेरिति, ततो धातो र्घ इति । द्वितीययोगे नञ्रहितं दादिपदमनुवर्तते । अदादे र्हस्यढत्वविधानेन परिशेषादेव दादेर्हस्य घत्वसिद्धौ द्वितीययोगेऽनुवृत्तदादिपदस्य फलान्तराभावेन सामर्थ्यात्तदुपदेशवद्दादिलक्षकम् । अर्थाधिकारानुरोधाच्च पूर्वयोगेऽप्यौपदेशिकदादिभिन्नस्यहस्यढत्वमित्यर्थो मन्तव्यः । अतएव नामधातुविषये दार्मालिडित्यादौ ढत्वघत्वाभावौ सिद्धौ । अथवेति पक्षैकवाक्यतयाऽपवादत्वपक्षेऽपि दादिपदस्योपदेशकालिकदादित्ववति लक्षणोचिता । नचैवमदादेर्हस्य ढत्वविधानात् ध्रुडित्यत्र ढत्वानुपपत्तिरिति वाच्यम् । वा द्रुह इत्यनेन ढत्वस्यापि विधानेनाऽदोषात् । नच घोदादेरित्युच्यते कथमधोगिति शंकायामेकाचो बश इति सूत्रार्थमपि प्रसंगान्निर्णेतुं धातावयवो यो दादिरित्युक्त्वा गर्दभयतेरप्रत्यये गर्धबित्यादौ भष्भावायोत्तरसूत्रे आवश्यकं वैयधिकरण्यमुक्त्वा दोग्धेति व्यपदेशिवद्भावात् सिद्धमिति भाष्यासंगतिरिति वाच्यम् । उत्तरार्थं वैयधिकरण्यमावश्यकमिति भाष्योक्त्या तस्येहानावश्यकत्वध्वननात् । उपदेश इत्यर्थकरणेनैवाधोगित्यादिसिद्धिरिति भाष्याशयः । नचौपदेशिकप्रायोगिकयोरौपदेशिकस्य ग्रहणमितिपरिभाषयैवोपदेशे लब्धे तदर्थं पूर्वोक्तप्रयासो विफल इति वाच्यम् । तत्तत्सूत्रे उपदेशग्रहणकरणेनास्या अप्रामाणिकत्वबोधनादिति दिक् ।

२७—दिव औत् ।

"दिव औत्"इति सूत्रे औतस्तकार उच्चारणार्थः, इत्संज्ञालोपाभ्यां विनैव तस्य निवृत्तिरिति प्राचीनमतम् । परेतु तान्तश्रवणापत्तिभिया विधेयविषये उच्चारणार्थानामपीत्संज्ञोचिता । अतएव अदड्डतरादिभ्य इति सूत्रे भाष्ये डित्वाभावेऽदादेशे पूर्वसवर्णदीर्घमाशंक्यानुनासिकोपधत्वादिति समाहितम् । नतूच्चारणार्थत्वादिति । अपिच द्वितीयवर्णोच्चारणे सहायसम्पादनेन चरितार्थेषु तत्र तत्र विशेषणार्थेष्विव हलन्त्यसूत्राप्रवृत्तौ प्रमाणाभावः । अतएवानुबन्धा एकान्ता इति पक्षे दिव औदित्यादीनां सर्वादेशत्वापादनं भाष्ये कृतम् । द्युभ्यामित्यादौ स्वरितत्वापत्तिवारणाय तितिप्रत्ययग्रहणं कर्त्तव्यमिति वार्तिकोपन्यासः कृतः । प्राचीनमते सर्वत्र तकारग्रहणस्योच्चारणार्थत्वेनेत्संज्ञकत्वाभावात्तितिप्रत्ययग्रहणमित्यस्य वैयर्थ्यापत्तिः स्पष्टैव । एवं विधेयविषये उच्चारणार्थानामप्यनुनासिकत्वेनेत्संज्ञा विधेया । अतएव वेरपृक्तस्येतिसूत्रेऽपृक्तग्रहणाभावे दर्विरित्यत्र लोपमाशंक्यानुनासिकपरस्य वेर्ग्रहणादितिसमा-

हितम् , नतूच्चारणार्थत्वादिना । एवञ्च प्राचीनमते भाष्यासंगतिः स्पष्टैव । ल्युडादावुकारस्याऽनाकाभ्यामेव निवृत्तिरिति न तस्येत्संज्ञाऽनुनासिकत्वाभावात् । अनुवादविषये तु हलन्त्यसूत्रभाष्यरीत्या तेषां व्यवसितत्वाभावेन चेत्संज्ञाशास्त्राप्रवृत्तेरुच्चारणार्थवर्णसहितसमुदायस्य तद्रहिते लक्षणा । विधौतु लक्षणानोचिता, न विधौपरः शब्दार्थ इति न्यायात् । नचैवं द्यौरित्यादौस्वरितत्वापत्तिरितिवाच्यम् , दिवो वकारस्यानुदात्तत्वेनानुदात्तधर्मिणो हलः स्थाने जायमानोकारस्य अनुदात्तत्वेनेकारस्य यणि, उदात्तस्वरितयोरिति सिद्धया फलाभावात् तितिप्रत्ययग्रहणंकर्त्तव्यमिति वार्तिकेन तदप्राप्तेश्च । वस्तुतस्तूच्चारणमेवार्थः प्रयोजनं यस्येत्यर्थस्वीकारे तु प्राचीनमतेऽपि न कोऽपि दोष इति दिक् ।

२८ - मघवा बहुलम् ।

ननु मघवानित्यत्र संयोगान्तलोपस्यासिद्धत्वाद्यथा नलोपो न भवति एवं दीर्घोऽपि न स्यादिति चेन्न । बहुलग्रहणेन दीर्घे कर्त्तव्ये संयोगान्तलोपस्यासिद्धत्वाभावज्ञापनात् । अतएव मघशब्दान्मतुपामघवान् , श्वन्नुक्षन्निति निपातनाच्च मघवेति रूपद्वयं संसाध्य सूत्रमिदं भाष्ये प्रत्याख्यातम् । अतएव हविर्जक्षिति निःशंको मखेषुमघवानिति । मघवानृजीषीत्यादिप्रयोगा उपपन्नाः । नचान्तोदात्तमघवन् शब्दस्य त्रादेशे वकाराकारस्योदात्तत्वं मतुपि ह्रस्वनुड्भ्यामिति प्राप्तस्य मतुबुदात्तत्वस्य न गोश्वन्निति प्रतिषेधेन पित्त्वादनुदात्तत्वे घकाराकारस्योदात्तत्वमिति फलभेदोदुर्वार इति वाच्यम् । त्रादेशपक्षे दीर्घवद्बहुलग्रहणेन घकाराकारस्योदात्तत्वस्याप्यङ्गीकारात् । यद्यप्यवर्णस्तृ मघोनश्च न शिष्यंछान्दसं हि तत् । मतुब्वन्योर्विधानाच्च छन्दस्युभयदर्शनादिति वार्तिकरीत्या मघवन्शब्दस्य लोकेऽसाधुत्वं लभ्यते । तथा च तृज्वत्सूत्रे भाष्येऽविशेषविहिता अपि शब्दा नियतविषया दृश्यन्ते । तथापि त्रन्तादेशस्यासाधुत्वबोधनेनोपपत्तौ विशिष्टस्यासाधुत्वबोधने मानाभाव इति दिक् ।

२९—अष्टाभ्य औश् ।

अनेन सूत्रेण जशः स्थाने उङ्विधानेऽलोन्त्यपरिभाषया सकारस्योकारेऽष्टा अ उ इति दशायामन्तरङ्गत्वात्सवर्णदीर्घे ततो गुणेऽष्टाविति रूपानुपपत्तिः । तस्मात् औश् कृतः । नचाष्टन आविभक्तावित्यनेन हलादिविभक्तावात्वविधानात् कथमजादिविभक्तावात्वमिति वाच्यम् , कृतात्वानुकरणबलेन जस्शसोर्विषयेऽप्यात्वं भवतीतिज्ञापनात् । लक्षणवशसम्पन्नत्वे त्वात्वस्य वैकल्पिकतया लाघवादष्टभ्य इत्येव व-

देत् । अयमाशयः—हलीत्यपकृष्यमाणं वाक्यभेदेन पुनर्विधानार्थं तेनाष्टन इत्यस्य क्वचिदप्यपि प्रवृत्तिरिति भावः । आत्ववैकल्पिकत्वे मानं तु अष्टनो दीर्घादिति सूत्रे दीर्घग्रहणमेव । तथाहि आत्वस्य नित्यत्वेऽसर्वनामस्थानविभक्तिपरकाष्टन्शब्दस्य सर्वत्रैव दीर्घान्तत्वाद्दीर्घग्रहणमात्ववैकल्पिकत्वे ज्ञापकम् । नचाष्टाभिरित्यत्र सावकाशस्याऽष्टनइतिसूत्रस्याऽष्टभिरित्यत्र परत्वात् झल्युपोत्तममित्यनेन बाधे सकृद्गतिन्यायेन पुनरष्टन्स्वराप्रवृत्तौ दीर्घग्रहणस्य स्यांशेचारितार्थ्याभावः, अष्टाभिरित्यत्र झल्युपोत्तममित्यस्य न प्राप्तिः । कार्यकालपक्षेऽनान्तत्वेन षट्त्वाभावात्, अल्विधित्वेनस्थानिवद्भावस्याप्रवृत्तेश्चेति वाच्यम् । पुनःप्रसंगविज्ञानबोधनद्वारैतद्विषये यथोद्देशपक्षस्यैवाश्रयणबोधनद्वारा दीर्घग्रहणस्याऽऽत्ववैकल्पिकत्वे ज्ञापकत्वमित्याशयादितिदिक् ।

३०—अष्टानाम् ।

अष्टन् आमित्यवस्थायां षट्त्वात् पूर्वं नुटि तत आत्वे अष्टानामिति सिद्ध्यति । यत्तु सन्निपातपरिभाषया नात्राऽऽत्वं किन्तु नोपधाया इति दीर्घे नलोपः । नलोपे कर्त्तव्ये सन्निपातपरिभाषायास्तु न प्राप्तिस्तद्दृष्ट्या नलोपस्यासिद्धत्वादिति तन्न । पूर्वत्र कर्त्तव्ये नलोपाऽसिद्धत्वेऽपि नुटि कृतेऽसिद्धत्वे मानाभावात् । सन्निपातस्याशास्त्रीयत्वेन तस्य नलोपासिद्धत्वेनालाभाच्च । आरोपितसन्निपातविघाताभावेऽपि वस्तुतो नलोपे तद्विघातस्य जायमानत्वेन नलोपेऽपि सन्निपातपरिभाषायाः प्रवृत्ते दुर्वारत्वाच्च । अतएव गव्यिता नाव्यितेत्यादौ सन्निपातपरिभाषया यलोपो न । अन्यथा यस्यहल इति यलोपस्य बहिर्भूततृज्निमित्तकत्वेन बहिरङ्गतयाऽन्तरङ्गावादेशं प्रत्यसिद्धत्वान्निमित्तविघाताभावः स्पष्ट एव । एवञ्च सन्निपातपरिभाषाया अनित्यत्वेनैव नलोपो वाच्यः । तदपेक्षया नलोपस्यासिद्धत्वात्परिभाषानित्यत्वेनात्वमेव युक्तम् । किञ्च षट्संज्ञासन्निपातेनजातस्यनुट आत्वे नलोपे वा न षट्त्वविघातकत्वम्, षट्त्वस्य स्थान्यलूधर्मत्वाभावात् स्थानिवद्भावेन कृतात्वेऽपि षट्त्वसत्त्वात् । कार्यकालपक्षे तत्तद्वध्येकवाक्यतापन्नषट्त्वस्य बहिरङ्गत्वात्पूर्वमात्वे कृतेऽनान्तत्वेन षट्त्वाभावान्नुड् न स्यादतो हलीत्यपकर्षः । अष्टनोदीर्घादिति सूत्रे दीर्घग्रहणाज्ज्ञापकात् आकारान्तस्य षट्संज्ञाश्रयणेऽथवा यथोद्देशपक्षस्यैवाश्रयणेनैवान्तरङ्गत्वात्पूर्वं षट्त्वे नान्तसंख्यावाचकत्वसमानाधिकरणधर्मविशेषरूपस्य षट्त्वस्य स्थान्यलूधर्मत्वाभावेन स्थानिवद्भावादाकारान्ते आश्रयणे प्रतिपत्तिगौरवमिति दिक् ।

३१—यथालक्षणमप्रयुक्ते ।

अष्टाभ्य औश् इतिसूत्रे बहुवचननिर्देशाद् यथा गौणे औशोऽप्रवृत्तिस्तथा-तज्ज्ञाप्यात्वमपि प्राधान्ये एव नतु गौणे । तेन प्रियाष्टानौ प्रियाष्टान इत्येव रूपं भवतीति प्राचीनमतम् । परेतु—अष्टन आविभक्ताविस्यत्रहलीत्यपकर्षणेनाऽष्टाना-मित्यस्य सिद्धिं विधाय तत्र पक्षे प्रियाष्टौ प्रियाष्टा इति न सिद्ध्यति । प्रियाष्टानौ प्रियाष्टान इति प्राप्नोतीत्याशंक्य यथा लक्षणमप्रयुक्ते इति प्रोक्तं भाष्ये। तत्र कैयटमते लक्षणमनतिक्रम्ययथा लक्षणमप्रयुक्तेलक्षणमनतिक्रम्य कार्यं ज्ञेयम्। अर्थात्—यस्य विशिष्टः प्रयोगो न स्मर्यते नापि प्रयोगनिषेधस्मृतिस्तद्यथालक्षण-मनुगन्तव्यम् । तदत्र माभूदात्वमित्यर्थः कैयटेनोक्तः ।

नागेशस्तु—यथालक्षणमित्यत्रालक्षणमितिच्छेदः, लक्षणस्याभावो-ऽलक्षणम् । लक्षणाभावस्ययोग्यता यथालक्षणम् । अप्रयुक्ते लक्षणाभावस्यैव योग्यता नतु लक्षणप्रवृत्तेः । कैयटमतेऽप्रयुक्ते इति वाक्यशेषासंगतिः । प्रयुक्तेऽपि लक्षणानतिक्रमात् । प्रयुक्तानामिदमन्वाख्यानमिति भाष्योक्तेश्च । किञ्च भाष्य-कारस्य लक्ष्यैकचक्षुष्कतया द्वितीयव्याख्यैवयुक्ता । एकस्यैव प्रयोगस्य भाष्यफक्किका-व्याख्यानभेदेन साधुत्वासाधुत्वयोरनौचित्याच्च। अतएव हलूङ्यादि सूत्रे अप्रयुक्ते लक्षणाभाव इत्येव व्याख्या कैयटेनादृता । नाम्रेडितस्येति सूत्रेऽपि प्रयोगमूलत्वादस्य शास्त्रस्य प्रयोगाभावे न प्रवृत्तिरिति कैयटेनोक्तम् । एवञ्च प्रियाष्टादीनामनभिधान-मेवोचितम् । अतएव अष्टाभ्य औशृइति सूत्रे भाष्ये विभाषा आत्वं यदयमात्व-भूतस्य ग्रहणं करोत्यष्टाभ्य इति । अन्यथा अष्टन इत्येव ब्रूयात् । कैयटमते गौणे प्रवृत्त्यभावाय बहुवचननिर्देशस्यावश्यकतया भाष्यासंगतिः स्पष्टैव । वस्तुतस्तु—अलक्षणमितिच्छेदे लक्षणशब्दस्य लक्षणप्रवृत्तिपर्यन्तेलक्षणायां मानाभावात् कैयटव्याख्यैव युक्ता । अप्रयुक्ते इति वाक्याशेषासंगतिस्तु न,"अकचूस्वरौ तु कर्त्त-व्यौ"इत्युक्त्वा नबहुव्रीहाविति सूत्रं भाष्ये प्रत्याख्यातम् । तथा च प्रयुक्तेऽपि लक्ष-णातिक्रमणदर्शनादिति दिक् ।

३२—मपर्यन्तस्य किमिति ।

ननु समुदायस्यादेशत्वेऽपि त्वयका, इत्येतत् प्रयोगसिद्ध्यर्थमोकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकजन्यत्र तु सुबन्तस्य टेः प्रागिति व्यवस्थाया युस्मदस्मद् वि-षयेवक्ष्यमाणत्वादन्तरंगत्वाद् युवामित्येतत् सिद्ध्युत्तरमकचि युवकामिति प्रयोगसिद्धौ

मपर्यन्ताधिकारो व्यर्थः । नच त्वयेति प्रयोगानुपपत्तिरितिवाच्यम् । योऽचीति सूत्रस्थानेऽच्ये इति न्यासकरणेनादोषादितिचेन्न, युवकाभ्यामित्येतत्सिद्धयर्थं तस्यावश्यकत्वात् । हलन्ता आदेशा इति पक्षे त्वया इत्यादेरसिद्धेश्च । मादेशस्य सर्वादेशत्वानुपपत्तेश्च । नचैवं मान्तस्येत्येवोच्यतां किंपरिग्रहणेनेति वाच्यम् । युष्मयत्यादेः क्विपि सुपि आदेशाभावार्थं परिग्रहणस्यावश्यकत्वात् । यथा कटिपर्यन्तंवास इत्युक्तेऽग्रे किञ्चिदस्तीति नियमेनप्रतीतिः, तथा मान्तादग्रेकिञ्चिदवशिष्टं तत्रैव युस्मदस्मदोरादेशाः । तदुक्तं भाष्ये — अवधिद्योतनार्थंपरिग्रहणं कर्त्तव्यम् । मान्तस्येत्युच्यमाने यत्रैव मान्तेयुष्मदस्मदी तत्रैवाऽऽदेशाःस्युः । क्व च मान्ते युष्मदस्मदयतेश्चाप्रत्यये, तत्रैवेत्यस्यानिष्ट एवेत्यर्थः । परिग्रहणाऽभावे तु यतःपूर्वोऽस्ति परश्चनास्ति सोऽन्त्य इति भाष्यसिद्धान्तात् मान्तपदस्य मुख्यार्थत्वलाभायात्रैव स्यात् । स्थानिवद्भावस्तु न, क्वौलुप्तमिति निषेधात् । यत्तु परिग्रहणाभावे मान्ताभिन्ने यत्रयुष्मदस्मदीतत्रैवादेशाः स्युः, सामानाधिकरण्येनान्वयौचित्यात् । परिग्रहणसत्त्वे तु तत् सामर्थ्याद् युष्मदस्मदोर्यौ मपर्यन्तावितिव्याख्यानाद्यान्ते, व्यपदेशिवद्भावेन मान्ते चादेशाः सिद्धयन्ति । व्यपदेशिवद्भावोऽप्रातिपदिकेनेति निषेधस्तु न, अस्याः प्रत्ययविधिविषयत्वादिति तन्न । परिग्रहणस्यवैयधिकरण्येनान्वये मणिमन्त्रादिन्यायेन नियामकत्वकल्पनापेक्षया पूर्वोक्तस्यैवयुक्तत्वात् । तत्रसामानाधिकरण्यासंभवाद् वैयधिकरण्यान्वयः । किञ्च यत्तु मतेऽवधिद्योतनार्थमिति भाष्याक्षरस्वारस्यभंगापत्तिरितिदिक् ।

३३—यूयं वयम् ।

ननु यूयं वयमित्यत्र स्थानिवद्भावेन जसःशयादेशः कुतो नेति चेन्न, अङ्गकार्यें कृते पुनर्नाङ्गकार्यमिति निषेधात् । ङेप्रथमयोरमित्यत्र मकारान्तरं प्रश्लिष्याम् मान्त एव शिष्यते नतु विक्रियतेइति व्याख्यानाद् वेतिप्राचीनमतम् ।

परे तु शेषविभक्तिभूतामादियुष्मदादिसन्निपातेनजातस्य लोपस्य तद्विघातकश्यादिनिमित्तत्वं नेति सन्निपातपरिभाषयैव श्यादेशो न । नचैवं युष्माकमित्यत्रापि सन्निपातपरिभाषयैव निर्वाहे साम इति निर्देशासंगतिरिति वाच्यम् । सुटस्त्वाकमवयवत्वेन सन्निपातविघाताभावात् । अतएव कृन्मेजन्तेति सूत्रे ह्रस्वत्वं तुग्विधेर्ग्रामणिकुलम् । अत्र सन्निपातपरिभाषाप्रयोजनव्याख्यावसरे यदा ह्रस्वमात्रस्य तुगागमो न तु तदन्तस्य तदेदंप्रयोजनं कैयटेन व्याख्यातम् । मकारान्तरप्रश्लेषेण वारणं नतु

युक्तं, भाष्यानुक्तेः। अतएव नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशाः पूर्वविप्रतिषेधेनेतिवार्तिकं व्याख्याय तेषु कृतेषु पुनः प्रसंगात् श्यादयः कस्मान्नभवन्ति? सकृद्गतिन्यायादिति प्रोक्तम्। प्राचीनरीत्या पुनः प्रसंगस्यैवाभावेनभाष्यासंगतिः स्पष्टैव। अत एव विभक्त्यादेशस्यावकाशो यूयं ब्राह्मणा इति भाष्ये प्रदर्शितः। प्राचीनरीत्या तत्रापि जसः शीप्राप्त्या भाष्यासंगतिः। यूयमित्यादिप्रयोगकरणेन तत्र श्यादिशंकासमाधानाकरणेन च सन्निपातपरिभाषाया विषयत्वं भगवता सूचितम्। अङ्गवृत्तपरिभाषया वारणं तु न सम्यक् तस्या अङ्गसम्बन्धिकार्यविषयत्वात्। वस्तुतो नैषा लक्ष्यसंस्कारिका, द्वयोरित्यादिनिर्देशासङ्गतेरिति दिक्।

३४—साम आकम्।

ननु युष्मद् आमित्यवस्थायां सामोऽभावादाकमादेशो न प्राप्नोति, साम इति रूपं सुट्प्रवृत्त्युत्तरं स्यात्। सुट्प्रवृत्तिरन्त्यलोपानन्तरम्, अन्त्यलोपश्च विभक्तेरादेशोत्तरमिति चक्रकापत्त्या ससुट्कनिर्देशो व्यर्थः, सूत्रासंगतिश्चेत्याह भाविनः सुटो निवृत्त्यर्थं ससुट्कनिर्देशः। अयमाशयः सामः प्रसंगे आकं भवतीति सूत्रार्थः। सामीत्यंशद्वयं, सकारः, आम् च, सस्य आमश्च प्रसंगे इत्यर्थः। प्रकृते साम्प्रतिकस्याम् बुद्धेः सत्त्वेऽपि सकारबुद्धेर्भाविन्या ग्रहणं, सकारोच्चारणसामर्थ्यात्। एवञ्चोभयबुद्धिप्रसंगे आकमादेशे सति सुडामोरत्रविषयेऽत्यन्तमप्रयोगः। अर्थात् आकमि स्थानिवद्भावेन साम्त्वमेव नत्वाम्त्वमिति सुटोऽप्रसक्तिः। स्थान्यादेशभावविषये सर्वत्रैवमेव। अस्तेर्भूरित्यनेनाऽऽर्धधातुकविषयेऽस्तेरप्रयोगो भुवश्च प्रयोगः प्रतिपाद्यते नतु सतो निवृत्तिः,शब्दानित्यत्वप्रसंगात्। किन्तु प्रसक्तबुद्धेरेव निवृत्तिः। तथा प्रकृतेऽपि। अत एव अतित्वाकमित्यादौ आकम्नुडभावौ सिद्धौ। ननु प्रयोगे आम एव सत्त्वेन कथं सामः स्थानित्वोक्तिः संगतेति चेन्न, आम्येव साम्त्वस्याहार्यारोपेणादोषात्। आदेशस्याऽऽम्त्वाभावाच्चात्र न नुट्। यत्र साम्भावी तत्रैवाकमित्यर्थस्तु न, सामोभावित्वस्यसर्वथा दुरुपपादत्वादिति दिक्।

३५—समानवाक्यत्वम्।

एकतिङ्वाक्यमिति वार्तिकस्वरसात्, एकतिङन्तपदघटितमेकवाक्यम्। तेन व्यपदेशिवद्भावेन पचतीत्यस्य तद्घटितसमुदायस्यचैकवाक्यत्वसिद्धिः। इदं स्वशास्त्रोपयोगि, एकवाक्यत्वलक्षणम्। अत एव पश्य मृगो धावतीत्यादौ लौकिकैकवाक्यत्ववति नाव्याप्तिः। अस्यैव शास्त्रकार्योपयोगित्वादेव "तिङ्ङतिङः" इति सूत्रेऽतिङ्-

ग्रहणं भाष्ये प्रत्याख्यातम्। सुप्तिङन्तचयोवाक्यं क्रिया वा कारकान्विता इत्यमरोक्त्या कारकान्वितक्रियाबोधकसुबन्तचयतिङन्तचयसुबन्ततिङन्तचयानां त्रयाणामपि लौकिकैकवाक्यत्वसिद्धिः। एतत्समानार्थकमेव "तिङ्ङतिङः" इति सूत्र एकतिङन्तार्थमुख्यविशेष्यकबोधजनकत्वमेकवाक्यत्वं सूत्रकाराभिप्रेतम्। आख्यातं सविशेषणं वाक्यमिति समर्थसूत्रे भाष्येऽपि प्रोक्तम्। साक्षात् परम्परया वा यद् विशेषणं तत्सहितमित्यर्थः। अत एव नद्यास्तिष्ठति कूले इत्यादौ नद्यादेः समानवाक्यत्वसिद्धिः। सविशेषणत्वेन विभागे साकांक्षत्वं लब्धम्। एतदेवैकोद्देश्यकैकविधेयकत्वरूपैकार्थत्वगर्भमेकवाक्यत्वलक्षणम्। 'अर्थैक्यादेकं वाक्यं साकांक्षं चेद्विभागे स्यात्' इति जैमिनिसिद्धान्तात्। अनेन ब्रूहिब्रूहीत्यत्र एकवाक्यत्वं न स्यात्, विशेषणानुपादानेन सविशेषणत्वाभावात्। तथा चानन्त्यस्यापि प्रश्नाख्यानयोरिति प्लुतो न स्यात्। तस्मात् स्वशास्त्रपरिभाषितं लक्षणमेकतिङ्वाक्यम्। अत एव ब्रूहिब्रूहीति, उदाहरणं भाष्ये दत्तम्। वस्तुतस्तु मुख्यविशेष्यतायोग्यक्रियाप्रतिपादकत्वप्रकारकतात्पर्यविषयपदाघटकपदद्वयाघटितत्वरूपमेकवाक्यत्वलक्षणं बोध्यम्। अत्रेदं तत्त्वम् 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' इत्यत्रैकतिङ्वाक्यमिति विहितैकवाक्यत्वं गृह्यते। वाक्यटः प्लुत उदात्तः इत्यत्राख्यातं सविशेषणं गृह्यते। अतएव "न च समानवाक्येद्वेतिङन्तेस्तः," इत्युक्तं भाष्ये। उभयोरेकत्वे तु एकतिङ्वाक्यमाख्यातं सविशेषणं वा, इत्येववदेत्। अतएव पच, पश्य च देवदत्त इत्यत्र वाक्यस्यटेरिति प्लुतसिद्धिरिति दिक्।

२६—अन्वादेशे नपुंसके एनद् वक्तव्यः।

अत्र "द्वितीयाटौस्सु" इति सम्बध्यते। नपुंसकेऽमो लुक्यपि तकारसामर्थ्याल्लुकालुप्तेऽपि प्रत्ययलक्षणप्रवृत्त्या न दोषः। अत्रकेचित्, वस्तुतस्तु सूत्रे एवैनद् वक्तव्यः। एनम् एनौ इत्यादि तु त्यदाद्यत्वेन सिद्धम्। नपुंसकेऽपि लुका लुप्तेऽपि तकारोच्चारणसामर्थ्यादेनदादेशः। एतच्छ्रितक इत्यादौ न दोषः, एकपदाश्रयत्वेनाऽन्तरङ्गे स्वमो र्लुकि चरितार्थत्वेनबहिरङ्गे सामासिके लुकि एनदादेशस्याप्रवृत्तेरित्याहुः। तन्न। येननाप्राप्तिन्यायेन एनतस्त्यदाद्यत्वापवादत्वेन तत्र कृते त्यदाद्यत्वाऽप्राप्तेः। अत एव भाष्ये नपुंसकैकवचने एनद् वक्तव्यः। कुण्डमानय प्रक्षालयैनदित्युक्तम्। अत्र नपुंसकैकवचने इत्युक्त्याऽन्यत्रैनो वक्तव्य इति भगवतैव प्रतिपादितम्। यद्येनत् क्रियते एनो न वक्तव्य इत्युक्तिरपवादत्वमजानत एक-

देशिनः "एतदस्त्रतसोः" इति साहचर्येण अनयोरुपसर्जने न प्रवृत्तिः। त्यदाद्यत्वेन सिद्धमिति भाष्यस्वरसाच्चेति दिक्

३७—तद्धितश्चासर्वविभक्तिः।

अत्र सूत्रे सर्वः पटो दग्ध इतिवत् सर्वशब्दोऽवयवकार्त्स्न्ये वर्त्तते। तथा च यस्माद् वचनत्रयात्मिकाविभक्तिर्नोत्पद्यते किन्त्वेकवचनमेव सतद्धितान्तोऽव्ययं स्यादिति सूत्रार्थः। ननु द्व्येकयोः, कर्मणि, द्वितीयेत्यादिभिरेकवाक्यतया सुपां विधानमिति पक्षेऽव्ययार्थे संख्याकारकयोरभावात् कथमेकवचनोत्पत्तिः। "अव्ययादाप्सुपः" इति ज्ञापकाश्रयणे च सर्वा विभक्तयः प्राप्नुवन्ति। किञ्च विहितानां नियमपक्षे सर्वेषु कर्मादिष्वर्थेषु विधेयतया प्रधानप्रत्ययानुरोधेन गुणभूतप्रकृतिभेदकल्पनेन सर्वविभक्त्युत्पत्तौ जातायां लोपेनैव जातस्य निवृत्तिः कार्या। प्रत्ययनिवृत्तौ च कल्पितगुणस्वरूपं स्वत एव निवर्तते। एवञ्चैकवचनमप्यव्ययेभ्यो नप्राप्नोति। अर्थनियमपक्षे कर्माद्यर्थयोग्यप्रातिपदिकाच्चेत् कर्मणि विभक्तिस्तदा द्वितीयैव। कर्मादिरहिते तद्योग्यप्रातिपदिकार्थे प्रातिपदिकात् प्रथमैवेत्याकारकनियमात् सप्तापि विभक्तयोऽव्ययेभ्यः प्राप्नुवन्ति, विभक्तीनामनियतत्वात् कर्माद्यर्थयोग्य प्रातिपदिकात्चेद् द्वितीया तदा कर्मण्येव। कर्मादियोग्यतद्रहितप्रातिपदिकार्थेएवप्रथमेतिप्रकृतार्थापेक्षप्रत्ययनियमपक्षे सर्वाः सप्तापि विभक्तयोऽव्ययेभ्यो लभ्यन्ते। प्रातिपदिकाच्चेद् द्वितीया तदा कर्मण्येव। प्रातिपदिकाच्चेत्प्रथमा तदा कर्मादियोग्यतद्रहितप्रातिपदिकार्थे एवेतिसामान्यापेक्षप्रत्ययनियमपक्षेऽव्ययेभ्यो विभक्तिप्राप्तिरेव न। "अव्ययादाप्सुपः" इतिज्ञापकाश्रयणे सर्वाविभक्तयः प्राप्नुवन्ति। एवञ्चसूत्रार्थासंगतिरितिचेत्! सत्यं द्विवह्वोर्द्विवचनबहुवचने इति सूत्रं कर्त्तव्यम्। तत एकवचनम्। द्वित्वबहुत्वयोरर्थयोर्द्विवचनबहुवचनाभ्यां बाधादेकवचनं विनाऽपिद्वित्वाद्यभावे सिद्धत्वेन सामर्थ्यान्महासंज्ञाबोध्यैकत्वाभावेऽप्येकवचनप्रवृत्तेः। एवञ्च विनिगमनाविरहात् सर्वविभक्त्येकवचनमनेन भवति। अतएव "अव्ययादाप्सुपः" इतिप्रत्याहारग्रहणं चरितार्थम्, तृतीया सप्तम्योरिति च। प्रातिपदिकार्थस्य यत्र कर्मत्वाद्याधिक्यसम्भावना तत्रैवप्रथमायाः प्राप्तिरिति नाव्ययेभ्यऔत्सर्गिकैकवचनंप्रथमायाः। यत्तुकैयटेन प्रथमातिक्रमे कारणाभावादनेकनियमबाधेगौरवाच्चाव्ययेभ्यः प्रथमैकवचनमेवेति प्रोक्तम्। तन्न समीचीनम्। स्वादि सूत्रे प्रथमायाः प्राथम्येऽपि नियमशास्त्रपर्यालोचनया द्वितीयाया अपि प्राथम्येन विनिगमकत्वाभावात्। निजां त्रयाणामित्यत्र त्रया-

णां ग्रहणेनाऽऽद्युदात्तश्चेति सूत्रे आदिग्रहणेन च व्याकरणशास्त्रे एतन्न्यायानाश्रयणाच्च । नचैकत्वाभावेऽपीत्येकवचनाङ्गीकारे घट इत्युक्ते एकत्वनिश्चयो न स्यादिति वाच्यम् । द्विवचनाद्यभावेन द्वित्वाद्यप्रतीतौ संख्यावदर्थत्वेन सत्त्वभूतत्वात्-प्रकरणाच्च तदुपपत्तेरिति दिक् ।

३८—कृन्मेजन्तः ।

ननु कृद् यो मान्तस्तदन्तमव्ययं स्यादित्यर्थे कारयाञ्चकारेत्यादौ संज्ञानुपपत्तिः । लिटोमान्तत्वाभावादिति चेन्न, लेरित्यस्याननुवृत्त्या आम इत्येव सुपो लुक्सिद्धेः । कृदन्तं यन्मान्तमित्यर्थस्तु न, स्वरादिगणे प्रशान्शब्दपाठात् । अ यथा श्रुत्या मान्तत्वेन प्रत्ययलक्षणेन कृदन्तत्वादनेनैवाव्ययत्वसिद्धे गणे पाठवैयर्थ्यापत्तिः । अतएव प्रतामौ लौरित्यादौ नातिप्रसङ्गः । नच आधये कुम्भकारेभ्य इत्यादौगुणे एत्वे च कृते स्थानिवद्भावेन कृदन्तत्वात् संज्ञापत्तिः, अन्तरंगसंज्ञादृष्ट्या बहिरंग-गुणादेरसिद्धत्वन्तु न शंक्यम् , संज्ञाया अपि विधिनिमित्तनिमित्तकत्वेन बहिरङ्ग-त्वात् । लिङ्गसंख्याऽन्वयित्वेऽपि अव्ययीभावादाविव प्रकृते संज्ञापत्तेरिति वाच्यम् । सन्निपातपरिभाषया संज्ञाया बाधात् । नच परिभाषया लुको बाधेऽपि कथंसंज्ञाबाधः ? लुकाहि तदीयसन्निपातविघातो नसंज्ञयेति । तथाचाव्ययसंज्ञायामकच्स्यादिति वाच्यम् । साक्षात्परम्परया वा स्वसन्निपातविघातकस्य स्वयमनिमित्तमिति परिभाषाया अर्थस्वीकारेणादोषात् । अतएव "उपादास्त" इत्यत्र न कित्वम् अकच्शास्त्रैकवाक्यतापन्नसंज्ञादृष्ट्या गुणादेरसिद्धत्वाच्च । लुगेकवाक्यतापन्नसंज्ञा तु नान्तरंगा, उभयोरपि शब्दतः सुबाश्रयत्वादिति दिक् ।

३९—अत्युचैसौ ।

अव्ययात् परयोरापसुपो लुगित्यर्थेऽधिकरणशक्तिप्रधानस्याप्युच्चैः शब्दस्य वृत्तिविषये शक्तिमत्प्रधानत्वाद् द्वितीयान्ततया अत्यादयः क्रान्ताद्यर्थे इति समासेऽवयवभूतोच्चैःशब्दादव्ययात्परत्वेन लुगापत्तिः । विहितविशेषणस्वीकारे तु समुदायस्य लिङ्गाद्यन्वयित्वेनाऽव्ययत्वाऽभावान्नदोषः । नच प्रयोजनं सर्वनामाव्ययसंज्ञायामिति भाष्यात् तदन्तस्याव्ययसंज्ञायां पूर्वोक्तापत्तिस्तदवस्थेति वाच्यम् ! सामानाधिकरण्यसम्बन्धेन लिङ्गाद्यनन्वय्यर्थबोधकत्वविशिष्टाव्ययपदवत्त्वेन हि अव्ययपदंबोधकम् । तादृशमहासंज्ञाकरणात् । एवञ्च तादृशार्थानांगणेऽनुकरणावश्यकत्वेनेतरेषामनुकरणे मानाभावेन

समुदायस्य संज्ञाया अप्राप्तेः। वस्तुतस्तु—अव्ययपदयोग्यलभ्यार्थस्य प्रधानाप्रधानन्यायेन सर्वनामसंज्ञासाहचर्येण च प्रसिद्धान्तरङ्गपदान्तरानपेक्षानुपसर्जनीभूतस्यैव लिङ्गाद्यनन्वयिनोग्रहणेन न समुदायस्यनाप्यवयवस्य संज्ञा। अतएव सर्वनामसंज्ञासूत्रस्थोपसर्जनप्रतिषेधानुवृत्त्या अत्युच्चैसौ इत्यादौ अव्ययत्वाभावमुपपाद्य तत्प्रत्याख्यान रीत्यैवात्रापि तत्प्रत्याख्यातम्। एवञ्च विहितविशेषणमङ्गाक्षेपो वा व्यर्थएव। अव्ययात्परत्वस्याप्यभावादिति दिक्।

४०—शूद्रा चामहत्पूर्वा जातिः।

शूद्राचेत्येकोयोगः, अमहत्पूर्वाजातिरित्यपरोयोगः। पूर्वयोगे जातिरित्यस्य सम्बन्धः। एवञ्च शूद्रशब्दष्टापंलभते जातिश्चेद्वाच्येति पूर्वयोगार्थः। तेन शूद्रत्वजातिविशिष्टास्त्री शूद्रेत्यत्र जातिलक्षणङीषं बाधित्वा टाप्सिद्ध्यति। पञ्चशूद्रीत्यत्र समाहारेजातिवाचकत्वाभावात् न टाप्। एवं शूद्रस्य स्त्री शूद्रीति पुंयोगेङीष्सिद्ध्यति, महत्पूर्वकः शूद्रशब्दष्टापं न लभते जातिश्चेद् वाच्येति द्वितीययोगार्थः। तेनाभीरत्वजातिविशिष्टा स्त्री महाशूद्रीत्यत्र न टाप्। यत्त्वजादिगणे शूद्रेत्येव पाठ्यम्। गौणमुख्यन्यायेन जातिलक्षणङीषो बाधेऽपि पुंयोगलक्षणङीषोऽबाधात्, शूद्रस्य स्त्रीशूद्रीति प्रयोगोपपत्तौ प्रथमयोगे जातिसम्बन्धो विफल एवेति तन्न। उक्तपरिभाषायां सदृशलाक्षणिकस्यैव गौणपदेन ग्रहणात्, तन्न्यायस्य पदकार्यविषयत्वाच्च। उत्तरयोगे जातिरित्यस्यासम्बन्धे जात्यन्तरनिवृत्तितात्पर्येण पूर्वंजातिमात्रविवक्षयामहच्छब्दस्य शूद्रशब्देन मृगक्षीरकुक्कुटाण्डवत् समासे ततः स्त्रीत्वविवक्षायां महती शूद्रेत्यर्थे महाशूद्रा इत्यत्र टापोऽनुपपत्तिः। तस्मादुत्तरयोगेऽपि जातिरित्यस्य सम्बन्धः आवश्यकः।

४१—टाबृचि।

पादोऽन्यतरस्यामिति प्राप्तङीपोऽपवाद इतिप्राचीनमतं नयुक्तम्। शेषाद् विभाषेति सूत्रस्थभाष्यविरोधात्। तथाहि-प्रतिपदविहितसमासान्तानां कपोवैकल्पिकत्वेन कबभावे यथासावकाशत्वमुक्तं, तथाऽस्यापिपादोऽन्यतरस्यामित्यस्य वैकल्पिकत्वेन तदभावे सावकाशत्वात्। अतएव "ङ्याप्प्रातिपदिकात्"इति सूत्रे भाष्यकृता पादशब्दसमानार्थकपदशब्दान्ताद् द्विपदेति संसाध्य सूत्रंप्रत्याख्यातम्। श्रूयते च छन्दसि तस्याः सप्ताक्षरमेकंपदं, एकः पाद इत्यर्थ इति भाष्योक्तं संगच्छते। एवञ्च पादशब्दान्तान्ङीपि द्विपदीति प्रयोग इष्यते एव। अपवादत्ववादिनां मते द्विपदीत्यस्याभावात् प्रत्याख्यानमसङ्गतमेव स्यात्।

नचप्रत्याख्यानपक्षे ङीपोवैकल्पिकत्वाद् ऋचिवाच्यायामेकपदा, एकपदी, एकपादिति रूपत्रयम् । सूत्रारम्भपक्षे तु एकपदी, एकपदा इति रूपद्वयमिति तत्रापि फलभेदो दुर्वार इति वाच्यम् । ऋच्यपि एकपदी, एकपादिति रूपयोरिष्टत्वात् । एवञ्चैकपाद्ऋगित्यस्य सूत्रमतेसिद्धये टाबृचीत्यत्राप्यन्यतरस्यां ग्रहणमनुवर्त्यम् । पादन्तस्य ऋच्यनभिधानमितिकल्पने तु सूत्ररीत्या इष्टस्य ङीबन्तप्रयोगस्यासिद्ध्यापत्तिरिति भावः ।

४२—अनुपसर्जनात् ।

ननु "समासप्रत्ययविधौप्रतिषेधः" इति निषेधेन द्वितीयतदन्तविधिविरहाद् बहुकुरुचरेत्यादौ ङीपोव्यावृत्तिसिद्धौ, अनुपसर्जनाधिकारो व्यर्थः । नचाचारक्विबन्तप्रकृतिककर्तृक्विबन्तान्ङीबादिवारणायैतदधिकार आवश्यक इति वाच्यम् । भाष्यप्रामाण्येन स्त्रियामाचारक्विबन्तप्रकृतिककर्तृक्विबन्तानामनभिधानात् । न च पञ्चस्त्रीगोव्यक्तयो धनं यस्येति विग्रहे पञ्चगवधन इत्यत्र टजन्तान्ङीबापत्तिवारणाय तदधिकार इति वाच्यम् । टजन्तस्य प्रातिपदिकत्वाभावेन ङीपोऽप्राप्तेः । आपिशलिनाप्रोक्तमधीते आपिशलाब्राह्मणीत्यत्रप्रोक्ताणः स्त्रियामवर्त्तमानान् ङीपः प्राप्तिरेव न, लुप्तस्याऽध्येत्रणस्तु प्रत्ययलक्षणं न, वर्णाश्रयत्वात् । एवं काशकृत्स्निना प्रोक्तां मीमांसामधीते काशकृत्स्ना ब्राह्मणीत्यत्र अध्येत्रणो लुप्तत्वेन 'अण्' यो अकार इत्यर्थे वर्णप्राधान्येन प्रत्ययलक्षणाभावान्न ङीप् । प्रोक्तार्थगतस्त्रीत्वमादाय तु पुनर्न ङीपः प्राप्तिः, लक्ष्ये लक्षणस्येति न्यायात् । एवञ्च स्त्रीप्रत्ययेषु तदन्तविधिर्भवति इति ज्ञापनार्थं तदधिकारस्यावश्यकत्वात् । न च ज्ञापितेऽपि तदन्तविधौ स्त्रियामित्यस्य गृह्यमाणविशेषणत्वात् बहुकुरुचरेत्यत्र कुरुचरशब्दस्य स्त्रियामविद्यमानत्वेन ङीपः प्राप्तिरेवनास्तीति तदधिकारो व्यर्थ इति वाच्यम् । प्रधानाप्रधानन्यायेन तदधिकारेण च स्त्रियामित्यस्य ङीप्प्रकृतिविशेषणत्वस्वीकारात् । अत एवातिधीवरीतिप्रयोगोपपत्तिः । नच कृतेऽप्यनुपसर्जनाधिकारे बहुकुरुचरेति समुदायस्यानुपसर्जनत्वात् ङीपः प्राप्तिर्दुर्वारेति वाच्यम् । तदधिकारसामर्थ्येनैवानुपसर्जनादित्यस्य गृह्यमाणविशेषणत्वस्वीकारात् । द्वितीयतदन्तविधिज्ञापनादेव कौम्भकारेय इतिसिद्धिः । अन्यथा कुम्भेन समासे ङीपि कुम्भविशिष्टस्यापत्यार्थेन योगे कार्यर्थे तदयोगस्यवक्तुमशक्यत्वात् कदाचित् कारीशब्दादपि ढकि कुम्भशब्दोकारे वृद्ध्यभावेन कुम्भकारेय इत्यापत्तेः । परमगार्ग्यायण इति भाष्यप्रयोगात् "तद्धितार्थ"इत्युत्तरपदे समासविधानाच्च समुदायेनैकार्थीभावेऽवयवेनापि तस्यैव सत्वात् । नहि कृद्ग्रहण-

परिभाषया विशिष्टान् ङीबुत्पत्तिः कर्त्तुं शक्या, कृन्मात्रग्रहण एव तस्याः प्रवृत्तेः। नच तदन्तग्रहणेऽपि कारशब्दस्य व्यपदेशिवद्भावेनाणन्तान्तत्वात् ततोऽपि कदाचिज्ङीपि कुम्भकारेयो दुर्वार इतिवाच्यम्। तदधिकारादेवासहाये एव व्यपदेशिवद्भावप्रवृत्तिज्ञापनात्। अर्थवत्सूत्रोक्तार्थवत्त्वाभावेनाणन्तस्याप्रातिपदिकत्वाच्च। न च समुदायान् ङीप्यपि स्त्रीप्रत्यये चानुपसर्जनेनेति तदादिनियमाभावेन केवलात् कारीशब्दादपि कदाचिड्ढकि पूर्वोक्तदोषोदुर्वार इति वाच्यम्। एतदधिकारादेव तदादिनियमाभावे अधिकस्यैवकार्यं न तु न्यूनस्येति ज्ञापनेनादोषात्। अत्रोपसर्जनत्वञ्च—स्वविशिष्टप्रकारताप्रयोजकत्वम्। वैशिष्ट्यञ्च—स्वान्तपर्याप्तशक्तिनिरूपकार्थनिष्ठविशेष्यतानिरूपितत्व; स्वपर्याप्तशक्तिज्ञानाधीनोपस्थितीयविशेष्यतासामानाधिकरण्यैतदुभयसम्बन्धेनेति दिक्।

४३-- अपरिमाणबिस्ताचित।

अत्र सूत्रे परिमाणपदेन परिमाणं तु सर्वत इति पारिभाषिकमेव गृह्यते। नचोन्माने द्विनिष्कीति न सिद्ध्येदिति वाच्यम्। सुवर्णबिस्तौ हेम्नोऽक्षे कम्बल्य मूर्णापलशतमिति कोशबलेन बिस्तादीनामपरिमाणत्वेनपरिमाणादित्येव सिद्धे सूत्रे बिस्तादिग्रहणेनोन्मानस्य चेन्निषेधस्तर्हि बिस्तकम्बल्ययोरेवेति नियमार्थत्वात्। अतएव द्वेवर्षेभूताद्विवर्षा द्वाभ्यां शताभ्यां क्रीता द्विशता, तिर्यङ्माने द्विहस्ता भित्तिरित्यादौ निषेधः सिद्धः। द्विकाण्डीरज्जुरित्यत्र काण्डान्तादिति सूत्रस्य क्षेत्रे एवेति नियमार्थत्वान्न निषेधः। पारिभाषिकपरिमाणग्रहणे प्रकृतसूत्रस्थभाष्यविरोधो भवति। तथाहि–इमौ द्वौ प्रतिषेधावुच्येते तत्रैकः शक्योऽवक्तुम्। कथमेवं वक्ष्यामिपरिमाणान्तात्तद्धितलुकि ङीब्भवति। द्विगोरित्येवसिद्धेः परिमाणान्तादेव तद्धितलुकि नान्यतः इति नियमार्थम्। ततोबिस्ताचितकम्बल्येभ्यो न तद्धितलुकीत्येव। पारिभाषिक परिमाणग्रहणे बिस्तादीनां परिमाणत्वाभावेन नियमादेव ङीपो व्यावृत्तिसिद्धौ द्वितीययोगो विफल एव स्यात्। एवं कम्बलाच्चसंज्ञायामितिसूत्रं वक्तुमशक्यम्। कथं कम्बल्यमिति, अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकीति निपातनादेतत् सिद्धम्। इदं तर्हि प्रयोजनं संज्ञायां यथास्यादिह माभूत् कम्बलीयोर्णा, नैतदस्ति प्रयोजनं, परिमाणपर्युदासेनपर्युदासेप्राप्ते कम्बल्यग्रहणंक्रियते तत्र परिमाणार्थं, परिमाणञ्च संज्ञैव। पारिभाषिकपरिमाणग्रहणे तु कम्बल्ये परिमाणत्वाभावेन परिमाणपर्युदासस्य प्राप्त्यभावात् परिमाणपर्युदासेन पर्युदासे प्राप्ते इतिभाष्यासंगतिः। परि-

माणान्तस्यासंज्ञाशाणयोरित्येवसिद्धे सम्वत्सरग्रहणमन्यत्र कालपरिमाणानां परिमाण-ग्रहणेन ग्रहणं नेति ज्ञापनार्थम् । तेनाऽपरिमाणबिस्ताचित्कम्बल्येभ्यो न तद्धितलुकि, द्विवर्षा त्रिवर्षा परिमाणपर्युदासेन पर्युदासो न भवति । पूर्वोक्तपरिमाणग्रहणे तूक्तो-दाहरणे प्राप्त्यभावात् सम्वत्सरग्रहणानर्थक्यशङ्कायाः, कालपरिमाणानां परिमाण-ग्रहणेन ग्रहणं नेति ज्ञापनफलस्य चासंगतिः स्पष्टैवेति सत्यम् । सूत्रकृता पारिभाषि-कपरिमाणं स्वीकृत्यैको योगः, नञ्द्वयं कम्बलाच्चेति सूत्राणि प्रणीतानि । नागे-शभट्टैः सूत्रकारमतमेव प्रतिपादितम् । भाष्यकृता च परिच्छेदकमात्रया ग्रहणं स्वीकृ-त्य नञ्द्वयखण्डनं, योगविभागःकम्बलाच्चेत्यस्यप्रत्याख्यानं च कृतम् । संख्याया इतिसूत्रस्थभाष्यञ्च भाष्यकृता स्वमतेनोक्तमिति न भाष्यत्रिकविरोध इति दिक् ।

४४—उपसर्जनात् किं शिखा ।

अत्र सूत्रे उपसर्जनग्रहणाभावे शिखेत्यत्रापि ङीषापत्तिः, सुशिखा, अशिखेति प्रत्युदाहरणं न युक्तम्, । आद्ये विशिष्टेऽदन्तत्वाभावेन ङीषोऽप्राप्तेः । द्वितीये नञ्पूर्वे, सहनञिति निषेधेन प्राप्त्यभावाच्च । अशिखेति भाष्योक्तप्रत्युदाहरणे एकदेशएव तात्पर्यमिति नागेशाशयः । वस्तुतस्तु—कल्याणपाणिपादा इत्यादौङीष्व्यावृत्त्यर्थ-मस्वाङ्गपूर्वपदादित्यनुवर्त्यं, अस्वाङ्गपूर्वपदात् परंयत्स्वाङ्गं तदन्तात् प्रातिपदिकान् ङीषो विधानेन शिखेत्यत्रास्वाङ्गपूर्वपदात् परत्वाभावेन ङीषः प्राप्तिविरहात् सुशिखे त्येवप्रत्युदाहरणं युक्तम् । अतएव भाष्येऽशिखेत्येव प्रत्युदाहरणंदत्तम् । नच "सह-नञ्" इति निषेधात् कथं ङीषः प्राप्तिरिति वाच्यम् । अस्यशिखेति समासे नञोऽ-भावात् । नच समासात् प्रागेवान्तरङ्गत्वाट्टापि ततः समासेऽदन्तत्वाभावान्नदोष इति वाच्यम् । उपसंजनिष्यमाणन्यायेन पूर्वंटापोऽप्रवृत्तेः ।

परेतु—उपसंजनिष्यमाणन्यायेन भविष्यदपवादविषयातिरिक्तत्वेन संकोचो-भवति नतु तद्घटकातिरिक्तत्वेन । अत एव 'व्याघ्री' इत्यादेः "गतिकारके" ति परि-भाषायाः फलं भाष्योक्तं संगच्छते । एवञ्च शिखशब्दात् पूर्वं टापि, अदन्तत्वाभा-वादेव ङीषोऽप्राप्त्या, अशिखासुशिखेति प्रत्युदाहरणं न युक्तं किन्तु शिखेत्येवप्र-त्युदाहरणं दातव्यम् । नचोपसर्जनग्रहणाभावेऽस्वाङ्गपूर्ववदात् परत्वाभावेन ङीषः प्राप्तिविरहात् कथमिदं प्रत्युदाहरणमिति वाच्यम् । बहुव्रीहिपदानुवृत्त्यैव शिखेत्यादौ ङीष्व्यावृत्तिसिद्धौ सूत्रे उपसर्जनग्रहणं यस्मात् प्रातिपदिकात् ङीष्चिकीर्षितस्तन्नि-रूपितोपसर्जनत्वविशिष्टस्वाङ्गवाचकान्तप्रातिपदिकात्' इति ज्ञापनार्थम् । तेन कल्या-

णपाणिपाद' इत्यादौ न ङीष्। पुनरस्वाङ्गपूर्वपदादित्यनुवृत्त्या कल्याणपाणिपादे-त्यादौ दोषवारणसम्भवादुपसर्जनग्रहणमुपसर्जनमात्राद् यथास्यात्। निष्केशीयूका" अतिकेशी माला, इतिप्रयोजनमभिहितं भाष्ये। एतावन्मात्रप्रयोजनकत्वे तु बहुव्रीहिपदे स्वरितत्वनिवृत्त्यैवाननुवृत्तिसिद्धौ उपसर्जनग्रहणं किमर्थमितिशंकायां शिखेति प्रत्युदाहरणं दत्तम्। एवञ्च बहुव्रीहिपदानुवृत्तिमभिप्रेत्योपसर्जनग्रहणफलनिराकरणे प्रवृत्तस्य भाष्यस्याऽस्वाङ्गपूर्वपदादित्यनुवृत्त्यभिलापकत्वेन स्वाङ्गाच्चोपसर्जनादिति यथास्थितन्यासे यस्मात् प्रातिपदिकान् ङीष् चिकीर्षितः' इत्यर्थसत्त्वेन कल्याणपाणिपादा' इत्यादौ दोषाभावेनास्वाङ्गपूर्वपदादित्यनुवृत्त्यभावस्यैव सत्त्वेनोपसर्जनग्रहणाभावे "शिखा" इतिदूषणं युक्तमेवेति दिक्।

४५—त्रेण्या च शलल्या।

ननु त्रीण्येतानि यस्या इति बहुव्रीहौ, एतशब्दस्योपसर्जनत्वात् कथं ङीबिति चेन्न। वर्णादनुदात्तादिति सूत्रेऽनुपसर्जनादित्यस्य तदन्तविशेषणत्वात्। अत एव गृह्यवृत्तिकृता नारायणेनात्र बहुव्रीहिं कृत्वाऽनेन ङीबित्युक्तमितिप्राचीनमतम्। परेतु—उपमानानीति सूत्रस्थभाष्यप्रामाण्यात्, बहुकुरुचरेत्यत्र ङीब्वारणाय टिड्ढाणञित्यादौ गृह्यमाणविशेषणत्वस्य क्लृप्तत्वाच्चापि गृह्यमाणस्यैव विशेषणम्। तथाहि—शस्त्रीश्यामो देवदत्त इत्यत्र श्यामाशब्दः शस्त्र्यामेव वर्तते, उपमेयन्तुसमासवाच्यमिति पक्षे शस्त्रीश्यामो देवदत्त इत्यत्र ह्रस्वत्वन्नप्राप्नोति उपसर्जनह्रस्वत्वाङ्गीकारे कुम्भकपाललोहिनीत्यत्रानुपसर्जनलक्षण ईकारो नप्राप्नोतीत्युक्तं भाष्ये। अनुपसर्जनादित्यस्य तदन्तविशेषणत्वे तु कुम्भकपाललोहितेत्यस्यानुपसर्जनत्वेन ङीष्स्यादेवेति भाष्यासंगतिः स्पष्टैव, तस्मात् पूर्वमेनीशब्दस्य सिद्धिं विधाय त्रिषु एनी-त्र्येणीति सुप्सुपेति समासः स्वीकर्त्तव्य इति दिक्।

४६—वोतोगुणवचनात्।

अत्र सूत्रे कृत्रिमाकृत्रिमन्यायेन गुणशब्दो न पारिभाषिको गृह्यते, अत इति विशेषणात्। किन्तु समस्तकृदन्ततद्धितान्त, सर्वनाम, जाति, संख्या, संज्ञाशब्दातिरिक्तो गुणवचनपदेन गृह्यते, आकडारसूत्रस्थभाष्यप्रामाण्यात्। तत्र हि प्रातिपदिकमात्रस्य पूर्वं गुणवचनसंज्ञामुक्त्वा तदनन्तरं तद्बाधकत्वेनैताः क्रमेण पठिताः। नचैवं रूपादीनांगुणवचनशब्देनग्रहणापत्तिः, नहिजातिसंज्ञया तेषां निरासः, आकृतिग्रहणद्रव्यवृत्तिप्रवृत्तिनिमित्तकानां जातिपदेन ग्रहणादिति वाच्यम्। गुणवचनेत्यन्व-

र्थसंज्ञया गुणोपसर्जनगुणिवाचकानामेव, तत्संज्ञाविधानात्। नन्वेवं कठादिशाखा-तदध्येतॄणाञ्च तद्धितान्तत्वान्निरासः। "सत्त्वे निविशतेऽपैति, पृथग्जातिषु दृश्यते। आधेयश्चाक्रियाजश्चसोऽसत्त्वप्रकृतिर्गुणः,, इति गुणलक्षणान्त्वेकदेशयुक्तिः, बहुविशेषणानां वैयर्थ्यापत्तेस्तथाहिनिविशते इति व्यर्थम्, अपैतीत्यनेनैव जातिव्यावृत्तिसिद्धेः। अक्रियाज इत्यनेनैव क्रियाव्यावृत्तिसम्भवात्, आधेय इतिव्यर्थम्। तेनैव द्रव्यव्यावृत्तिसिद्धावसत्त्वप्रकृतिपदोपादानं व्यर्थम्। भाष्यकृताऽव्याख्यानाच्च, तस्मादाकडारसूत्रस्थं भाष्योक्तं ग्राह्यमिति दिक्।

४७—जातेरस्त्रीविषयादयोपधात्।

अत्र भिन्नेष्वभिन्नाभिधानप्रत्ययनिमित्तं जातिरिति वेदान्तिमतसिद्धं, नित्यमेकमनेकानुगतं सामान्यमिति तार्किकमतसिद्धञ्च। जातिलक्षणमयुक्तम्, शुक्लादिगुणस्यैकत्वनित्यत्वपक्षे तत्रातिव्याप्तेः। नापि जननेन प्राप्यते सा जातिः, युवत्वादावव्याप्तेः। तथाचाकृत्यवयवसंनिवेशो ग्रहणं यस्या इत्यर्थकाकृतिग्रहणाजातिरिति लक्षणं सूत्रकाराभिप्रेतम्। ईदृशाकारो गौरित्याकृत्युपदेशव्यङ्ग्या गोत्वादिजातिः। नच बाल्याद्यवस्थाभेदभिन्नानेकदेहवृत्तिदेवदत्तत्वादेराकृतिव्यङ्ग्यत्वेन जातित्वापत्तिरिति वाच्यम्, समानकालिकानेकव्यक्तिवृत्त्यनुगतसंस्थानव्यङ्ग्याजातिरिति तदाशयात्। बाल्याद्यवस्थाभेदेऽपि तदभेदाप्रतीतेश्च। स एवायमिति प्रतीत्या, तज्जातीयोऽयमित्यप्रतीत्या च न देवदत्तत्वादे र्जातित्वम्। पञ्चेन्द्रोपाख्यानादिभिरनेकेषां समानकालिकत्वेऽपि सर्वेषां संस्थानस्यैकत्वे प्रमाणाभावादिन्द्रत्वादिकं नजातिः। नच वृषलत्वादीनां जातित्वं न स्यात्, अवयवसंस्थानस्य ब्राह्मणादिसाधारण्येन वृषलत्वादिजातेराकृतिग्रहणत्वाभावादिति वाच्यम्। लिङ्गानाञ्च न सर्वभाक्, सकृदाख्यातनिर्ग्राह्येतिलक्षणान्तरस्यापि सत्त्वेनादोषात्। असर्वलिङ्गत्वे सत्येकस्यां व्यक्तौ कथनात् व्यक्त्यन्तरे कथनंविनापि सुग्रहा जातिरितितदर्थः। अयं ब्राह्मण इत्युपदेशात् तत्पित्रादौ ब्राह्मणत्वं, अयं वृषलइत्युपदेशात्तत्पुत्रादिषु वृषलत्वं सुग्रहम्। आकृतिग्रहणाजातिरिति लक्षणं नित्यानित्यसाधारणम्। यावद्द्रव्यभावित्वमितिलक्षणान्तरमनित्यव्यावृत्त्यर्थं भाष्ये प्रदर्शितम्। एवञ्च भिन्न ऋषिकर्तृकलक्षणद्वयप्रामाण्येन कुमारादिशब्दे जातिकार्यविकल्पः। अतएव युवजानिरित्यत्र पुंवत्त्वं, युवतितरेत्यत्र तदभावश्च भाष्ये उदाहृत इति दिक्।

४८—गोत्रञ्च चरणैः सह ।

ननु पूर्वोक्तलक्षणद्वयस्वीकारेऽप्यौपगवी, कठीत्यादौ ङीषोऽनुपपत्तिरनुगतसंस्थानव्यङ्ग्यत्वाभावेन सर्वलिङ्गत्वेन च जातित्वाभावादितिचेन्न, गोत्रञ्च चरणैः सहेति तृतीयलक्षणस्यापि सत्त्वात् । अपत्यप्रत्ययान्तः शाखाध्येतृवाचिशब्दश्च जातिकार्यं लभते इति तदर्थः । अत्रापत्यं पौत्रेति सूत्रोक्तं शास्त्रीयं गोत्रं गृह्यते । अतएव गोत्रात् यूनिप्रत्ययो भवति, स्त्रियां लुगिति न्यासे औपगवी माणविकेत्यत्राणोऽनुपसर्जनत्वाभावात् टिड्ढेति ङीपोऽनुपपत्तिः । नचाणन्तस्यानुपसर्जनत्वान्नदोष इति वाच्यम्, औपगवीभार्य इत्यत्र जातिलक्षणपुंवत्त्वप्रतिषेधानुपपत्तेः । नच वृद्धिनिमित्तस्येति पुंवत्त्वप्रतिषेधो भविष्यतीति वाच्यम् । ग्लुचुकायनीभार्य इत्यत्र ङीष्पुंवत्त्वप्रतिषेधश्च न प्राप्नोतीतिभाष्यासंगतेः । अपत्यमात्रस्य जातित्वे टिड्ढेत्यपेक्षया परत्वाज्जातिलक्षणङीष एव वक्तुं युक्तत्वम् । पुंवत्त्वप्रतिषेधो न प्राप्नोत्यसंगतिश्च । नच सर्वतोऽक्तिन्नर्थादित्यनेन ङीष्भविष्यतीति वाच्यम् । तावतापि पुंवत्त्वप्रतिषेधो न प्राप्नोतीत्यसंगतेः स्पष्टत्वात् । शास्त्रीयगोत्रग्रहणादेव ब्राह्मोऽजाताविति सूत्रेऽपत्ये जातौनेत्यर्थः संगच्छते । प्राचीनमतेऽपत्यस्य जातित्वाव्यभिचारात् । अजातावित्यस्य वैयर्थ्यापत्तिः । ब्राह्मो नारद इति प्रयोगासिद्धिश्च । नच नवीनमतेऽनन्तरापत्यप्रत्ययान्ते अवन्तीत्यादौ कथं जातिप्रयुक्तो ङीषिति वाच्यम् । अनन्तरेऽश्वत्थाम्नि द्रौणायनिवद् गोत्रत्वारोपेण तदुपपत्तेः, युनि तु न शास्त्रीयगोत्रत्वारोपः, युवैव न गोत्रमिति नियमेन गोत्रसंज्ञानिषेधात् । वस्तुतस्तु नवीनमतेऽपि औपगवीभार्य इत्यत्र युवप्रत्ययस्यलुकि अणन्तस्याप्रत्ययप्रत्ययान्तत्वेन जातित्वात् पुंवत्त्वनिषेधसिद्धिस्स्यादेवेति भाष्यासंगतिर्दुर्वारा । नच गोत्रञ्चचरणैरित्यस्यानुपसर्जनीभूतगोत्रप्रत्ययस्तदन्तंजातिकार्यं लभते इत्यर्थस्वीकारान्नभाष्यविरोध इति वाच्यम् । अनुपसर्जनः श्रूयमाणोऽप्रत्ययप्रत्ययः तदन्तं जातिकार्यं लभते इत्यर्थे भाष्यविरोधस्य तादवस्थ्यात् । एवञ्च तस्यैकदेशयुक्तित्वेन प्राचीनमतेऽपि न भाष्यविरोधः । जातिलक्षणङीष एव परत्वाद्वक्तुं युक्तमिति कथनमपि न समीचीनम् । उभयमते जातित्वाभावात् । ब्राह्मोऽजाताविति सूत्रेऽनतिदिष्टजातिलाभार्थमजाताविति । अतएव ब्राह्मणः शूद्रः, ब्राह्मणो वशिष्ठ इति प्रयोगयोरुपपत्तिः । नवीनमते ब्राह्मणःशूद्रइत्यनिष्टापत्तिः । नच ब्राह्मोनारदइतिप्रयोगासंगतिरितिवाच्यम्,तस्यदेवर्षित्वेन जातित्वाभावात् । अत एवानन्तरापत्यप्रत्ययान्तेऽवन्तीत्यादौ जातिलक्षणङीष्सिद्ध्यति, द्रौणायनिवदारोपे न

मानम्, मदुक्तरीत्यैवपत्तेरिति दिक् ।

४६—सिद्धान्तिमतमाह ।

परे तु आकृतिग्रहणा जातिः, लिङ्गानाञ्चनसर्वभाक्, सकृदाख्यातनिर्ग्राह्या, इति समस्तमेकमेवलक्षणम्, नतु लक्षणद्वयम् । आकृतिपदमुपदेशोपलक्षणम्, आकृति-द्वारा साक्षादुपदेशेन वा ग्राह्या जातिरित्यर्थः । अथवा आकृतिग्रहणोपदेशव्यङ्ग्या च जातिः । प्रथमपक्षे उपदेशान्तर्गतत्वेनाकृत्याश्रयान्यतरोपदेशव्यङ्ग्येत्यर्थः । लिङ्गा-नाञ्च न सर्वभागिति, जातिस्वरूपानुवादकम्, तेन शुक्लादिगुणानामेकत्वेऽपि जाति-त्वाभावः सिद्ध्यति । जातेरसर्वलिङ्गत्वादेव विशेषणानाञ्चेति सूत्रे जातेराविष्टलिङ्गत्वं भाष्योक्तं संगच्छते । नच तटं त्रिषु, इति कोशविरोध इति वाच्यम्,तस्य प्रायिकत्वा-ज्जातेरेकशब्दवाच्यायास्त्रिलिङ्गत्वासम्भवात् कोशकृतां प्रमादएव । सकृदाख्यातनि-र्ग्राह्येत्यंशेनैकत्वमनेकानुगतत्वञ्च बोधितम् । अतएव प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः, असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः; इति लक्षणान्तरं भाष्ये उ-क्तम्। सत्त्वस्य द्रव्यस्यप्रादुर्भावविनाशाभ्यां गुणैर्युगपत्प्राप्नोति सा जातिरित्यर्थः। यावद्द्रव्यभाविनीत्यर्थः । अत एव कःपुनरेतयोर्जातिलक्षणयोर्विशेषः, यथा पूर्वल-क्षणं तथा कुमारीभार्य इति भवितव्यम् । यथोत्तरलक्षणं तथा कुमारभार्य इति भाष्ये लक्षणमित्येकवचनमेव प्रयुक्तम् । आकडारसूत्रभाष्ये आकृतिग्रहणाजाति-रित्येवोक्तमितिदिक् ।

इति भागलपुरमण्डमध्यवर्तिसिमराग्रामनिवासिकामाख्याविद्यालयप्रधाना-
ध्यापकश्रीमन्मालिकझाशर्मतनूद्भवशुकदेवझाशर्मसंग्रहीत-
लघुशब्देन्दुशेखरप्रकाशः परिपूर्णः ।

* इति शम् *

१९५७

नव्यव्याकरणाचार्यपरीक्षायाम् ।

१ वर्षे १ पत्रम् ।

लघुशब्देन्दुशेखरस्य स्वादिसन्ध्यन्तभागे प्रश्नाः

सूचना—सर्वे प्रश्नाः समानाङ्काः । पञ्चैव समाधिमर्हन्ति ।

१ ऊकालोऽज्झिति सूत्रे ह्रस्वशब्दे सवर्णग्रहणाभावमुपपाद्य, कार्यासिद्धत्वनिराकरणपूर्वकः पूर्वत्र नेतिन्यासो निरसनीयः ।

२ "अणुदित्सवर्णस्य चाप्रत्ययः" इत्यस्यार्थं सम्यगुपवर्ण्याऽण्ग्रहणस्य प्रयोजनप्रत्याख्याने प्रदर्शनीये ।

३ "इको गुणवृद्धी" इतिसूत्रे गुणवृद्धिशब्दाभ्याङ्गुणवृद्धीत्यर्थे मानम्फलञ्च सम्यक् प्रदर्श्य, "लक्षणप्रतिपदोक्त" परिभाषयाऽन्यथासिद्धत्वं समन्वयपूर्वकं सम्भाव्य निराक्रियताम् ।

४ "हैहेप्रयोगे हैहयोः" इति सूत्रस्य विध्यर्थत्वन्नियमार्थत्वं वेत्युपपाद्यताम् ।

५ (क) तण्डुलानित्यत्र स्थानिवत्त्वेन नलोप आपाद्य निराक्रियताम् ।

(ख) खण्डयत स्थानिवत्सूत्रस्यान्यथासिद्धत्वमेकदेशविकृतन्यायेन ।

६ "सुच" इतिन्यासस्य सुवचत्वम्प्रतिपाद्य "द्वित्रिश्चतुरिति कृत्वोर्थे" इति-सूत्रस्थकृत्वोऽर्थेद्वित्रिश्चतुष्पदयोः साफल्यं सुष्ठु प्रदर्शयत ।

७ ङमो ह्रस्वादचीति सूत्रस्यार्थं विस्तरेण प्रतिपाद्य, व्याख्योपबृंहितस्य

उपधारक्षनं कार्यन्नमोरुकरणे सति ।

लोपे प्रकृतिभावे च नोपधारक्षनं मतम् ॥

अस्य पद्यस्य सप्रसङ्गमाशयमुपपाद्य खण्डयत ।

———

१ वर्षे २ पत्रम् ।

अष्टसु केचन पञ्चैव समाधेयाः । सर्वे प्रश्नाः समानाङ्काः ।

१ "कृत्तद्धित" इति सूत्रे समासग्रहणविषयकौ विधिनियमपक्षौ युक्त्या समुपस्थाप्य निषेध्यं निविध्य च परिहेयप्रदर्शनपूर्वकम्, अपरिहेयनियमस्वरूपं दर्शयत ।

२ कोशस्थपदानां शब्दपरत्वम्, अर्थपरत्वं वा, इति ग्रन्थरीत्या दर्शयित्वा, तत्रत्यं सगमकं स्वसिद्धान्तं स्थिरीकृत्य च प्रकृते विचारसङ्गतिं संगमयत ।

३ "ङिति ह्रस्वश्च" इतिसूत्रस्य वाक्यार्थबोधौ प्राङ्नव्ययोर्मतेन उपपाद्य तत्रत्यदोषगुणौ विचार्य्य नित्यस्त्रीत्वं परिष्कुरुत ।

४ अधोक्, दामलिट्, अनयोः सिद्ध्यै वैयधिकरण्याऽन्वयमनुसरत उपदेशं लक्षयतश्च मध्ये कतरो ज्यायानिति निर्दिश्य, उपदेशलाभोपयोगिन्यौ युक्ती योजयत ।

५ "षट्चतुर्भ्यश्च" इति सूत्रे बहुवचननिर्देशस्य फलविशेषं प्रदर्श्य तदसहतश्च मतमुपवर्ण्य तत्र युक्तायुक्तत्वे विवेचयत ।

६ आधये, चिकीर्षवे, कुम्भकारेभ्य इत्यादीनामव्ययत्वम्परिहृत्य परमोच्चैः, अत्युच्चैसौ, इत्यादौ विभक्तेर्लुग्भावाभावौ मतभेदप्रदर्शनपुरःसरं साधयत ।

७ अनुपसर्जनाधिकारस्य, अनडुत्, आपिशला-इत्यादौ स्त्रीप्रत्ययव्यावृत्तिरूपफलस्य सत्त्वेऽपि तदन्तविधिज्ञापकता कथं संगच्छते ? तस्य चानन्यथासिद्धं फलं किम् ? सर्वं सुष्ठूपपादयत ।

८ गुणवचनपदार्थम्मतभेदेन परिस्फोट्य सारासारौ निरुच्य च "सत्वे निविशतेऽपैति" इति कारिकां ग्रन्थरीत्या सपदकृत्यं व्याख्याय च स्वसिद्धान्तं प्रकटयत ।

——

शुद्धाशुद्धि-पत्रम्

पृष्ठाङ्काः	पङ्क्तयः	अशुद्धयः	शुद्धयः
प्रास्ताविके	१४	विधेयाः	विधेयः
१	८	अइउण	अइउण्
३	२५	ट्	ट
६	१६	मया	मस्या
१०	२८	स्वरूप	स्वंरूप
११	११	विभषे	विभाषे
११	२१	मितस्य	मित्यस्य
११	२६	प्रत्यादि	प्रत्ययादि
१४	१६	थानेयोगाः	स्थानेयोगा
१६	५	अत्र	अथ
१६	८	ऽदितिश्य	ऽतिदिश्य
१६	१४	अप्रत्ययेत्यस्य-	अप्रत्यय इत्यस्य
१६	२६	स्थिता	स्थितौ
२०	१३	वुत्वे	वेतत्तदोरिति
२२	७	दृष्टान्तमप्ययुक्तम्·	दृष्टान्तोऽप्ययुक्तः
२५	२५	नित्याप्यत	नित्याप्लुत
२६	१०	अमिति	आमिति
२६	२६	वापि	वपि
३१	१७	सिद्धेः	सिद्धे
४२	२६	विभक्त	विभक्ति
४२	१५	रूपासिद्धे	रूपसिद्धे
४२	२१	उभयशब्द	उभशब्द
४२	२२	वचने	वचनं
४३	१०	प्रत्ययस्य	कप्रत्यये
४४	१२	आकारप्रश्लेष	आकारप्रश्लेषो व्यर्थ
४५	१४	पदादिभ्यः	पादादिभ्यः
४५	१४	पादादिवचनं	पदादिवचनं
४७	८	विशेषणाश्रयणो-	विशेषणानाश्रयणे

पृष्ठाङ्काः	पङ्क्तयः	अशुद्धयः	शुद्धयः
४८	२१	भती	भवती
४८	१६	प्रत्यय लक्षण	प्रत्ययलक्षणं
४६	२७	आत	आबन्त
४६	८	प्रत्ययलक्षण-	प्रत्ययलक्षणा
५०	२८	दी	नदी
५०	६	दङ्गस्यविशेष्य	दङ्गस्यविशेषण
५०	२६	ग्रहणहितस्यैव-	ग्रहणरहितस्यैव
५५	७	स्यांशे	स्वांशे
५६	८	क्रार्यं	कार्यं
५७	२६	न तु	तु न
५८	१६	वन्या	विन्या
५६	१७	तिङन्त	तिङन्ते
५६	१५	वाक्यटेः	वाक्यस्यटेः
५६	२३	ऽपि	ऽमि
६०	५	शब्दे	शब्दो
६०	२१	द्विवचन	द्विंवचन
६१	३	पीत्येक	प्येक
६१	६	अयथा	अन्यथा
६४	१५	परिमाण	अपरिमाण
६५	२६	वदात्	पदात्
६५	८	मात्रया	मात्र
६६	२	ङीविति	ङीषिति
६६	२	पाणिपाद	पाणिपादा
६६	१२	ङीबिति	ङीषिति
६६	१४	ङीबिति	ङीषिति
६६	१६	च्चापि	च्चात्रापि
६८	१३	ङष्	ङीष्
३८	२२	अप्रत्यय	ऽपत्य
६८	२६	प्रत्यय	पत्य
६६	२	वपत्ते	वोपपत्ते

प्राप्ति-स्थानम्—

मास्टर खेलाड़ी लाल एण्ड सन्स

कचौड़ीगली, वाराणसी ।

मोतीलाल बनारसीदास

नेपाली खपरा, वाराणसी ।

तथा—

वाराणसेय प्रमुख संस्कृत पुस्तक-विक्रेता ।